Barcode : 99999990291858
Title - Mimamsa Kausthubha Vol.-IV
Author - Khandadeva
Language - sanskrit
Pages - 93
Publication Year - 1904
Barcode EAN.UCC-13
9 999999 029185

Sasthra Mukthavali, No-22

MEEMAMSA KAUSTHUBHA

(Vol- IV)

(*A Commentary on Jaimini Sutra*)

By

KHANDADEVA

Edited By

P. B. ANANTHA CHARIAR

Sanskrit Pandit.

Printed and Published

by the Proprietor Sri Sudarsana Press.

CONJEEVERAM.

1904

(Copy Right Reserved)

Price Rs 1 - 2 - 0

शास्त्रमुक्तावळी—१२

मीमांसा कौस्तुभः ।

(द्वितीयाध्यायस्य प्रथम.पादः)

जैमिनीय पारावारपारीणेन विद्वद्वर्येण

खण्डदेवेन विरचित·,

श्रीकांची प्रतिवादिभयंकरानन्ताचार्येण

संशोधितः

श्रीसुदर्शनमुद्राक्षरशालायाम्

मुद्रितः ।

॥ कांची ॥

१९०५

BHARATIYA VIDYA BHAV
LIBRA

अस्य पुनर्मुद्रणादिविषये मुद्राशालाधिपस्यैवाधिकारः ।

इदानी मेतन्मूल्यम्   १—२—०

मीमांसाकौस्तुभ द्वितीयाध्याय प्रथमपादस्थानां सूत्राणां अकारादिक्रमेण सूची ।

सूत्राणि		पृष्ठांकः
अर्थाश्च	(२-१-४२)	९४
अर्थेन त्वपकृष्येत देवतानामचोदनार्थस्य गुणभूतत्वात्	(२-१-१४)	७०
अर्थैकत्वादेकं वाक्यम्	(२-१-४५)	९५
अनर्थकश्च तद्वचनम्	(२-१-२६)	७८
अनाम्नातेष्वमन्त्रत्वम्	(२-१-३४)	८७
अनुषङ्गो वाक्यसमाप्तिः	(२-१-४७)	१०२
अन्यश्चार्थः प्रतीयते	(२-१-२७)	७९
अपि वा प्रयोगसामर्थ्यात्	(२-१-३१)	८२
अपि वा श्रुतिसंयोगात्	(२-१-२४)	७७
अभिधानं च कर्मवत्	(२-१-२८)	७९
आश्रितत्वात्प्रयोगस्य	(२-१-५)	८
गीतिषु सामाख्या	(२-१-३६)	९०
गुणश्चानर्थकः स्यात्	(२-१-१८)	७३
गुणार्थो व्यपदेशः	(२-१-४३)	९६
चोदना पुनरारम्भः	(२-१-६)	३६
तच्चोदकेषु मन्त्राख्या	(२-१-३२)	८५
तथा याज्यापुरोरुचोः	(२-१-१९)	७४
तदर्थशास्त्रादेकद्रव्य शेषभूतत्वात्	(२-१-११)	५९
तानि द्वैधं गुणप्रधानभूतानि	(२-१-७)	५०
तुल्यश्रुतित्वाद्वेतरैः सधर्मः स्यात्	(२-१-१०)	५९
तेषामृग्यत्रार्थवशेन	(२-१-३५)	८९
[illegible]	(२-१-२३)	७५

श्रीरस्तु ।

श्रीमते हयग्रीवाय नमः ।

शास्त्रमुक्तावली ।

मीमांसाकौस्तुभः ।

(द्वितीयाध्याये प्रथमः पादः ।)

अपूर्वाधिकरणम् ।

१ - (सू) भावार्थाः कर्मशब्दा स्तेभ्यः क्रिया प्रतीयेतैषह्यर्थो वि [भि] धीयते ॥ २ - १ - १ ॥

एव मुक्तेषु धर्मप्रमाणेषु अधुना प्रमेयभूतं धर्मस्वरूपं निरूप्यते । तत्रापि धर्मप्रमाणेषूक्तेषु अर्थात् देवताप्रमाणप्रतिपाद्यो धर्म इत्येवं सामान्यतो धर्मस्वरूपावगतावपि कात्स्न्र्येन तदनवगमा दिदानीं धर्मस्वरूपस्य विशेषतो ज्ञानाय तद्गतानेकाकारस्वरूपो भेदो निरूप्यते । अतश्च उत्सर्गापवादाभ्यां भेद एवाध्यायार्थः । तत्रापि प्राधान्येन भावनाभेदो निरूप्यते । धात्वर्थभेदस्तु तत्सिद्ध्यर्थं, अवच्छेदकीभूतधात्वर्थभेदेन तदवच्छिन्नभावनाया भेदस्य शब्दान्तराधिकरणे वक्ष्यमाणत्वात् । इदं च प्रायिकं, अत एव धात्वर्थभेदाभावेपि गुणादिप्रमाणेन यतन् भावनाभेदोपि गुणफलाधिकारेण क्रियत एवेति वक्ष्यते । अपूर्वभेदस्तु भावनाभेदानुनिष्पादितया । सतिहि व्यापाररूपभावनाभेदे फलभेदाधीनतया व्यापारभेदस्य फलभूतापूर्वभेदसिद्धिः सुलभैव । अतश्च धात्वर्थभेदापूर्वभेदयो भावनाभेदसिद्ध्युपयोगिफलत्वरूपत्वेपि प्राधान्येन भावनाभेदस्यैव शब्दान्तरादिभिः षड्भिः प्रमाणैः प्रतिपाद्यत्वात् स एवैकोऽध्यायार्थः । तत्र च मानाधीना मेयसिद्धिरिति न्यायेन प्रमाणनिरूपणस्य धर्मस्वरूप

निरूपणं प्रति हेतुत्वात् तदनन्तर'मेतदारम्भो नायुक्तः । अंगत्वादि-निरूपणस्यापि प्रमाणाधीनत्वे सत्यपि भेदविशेषस्याप्यधिकत्वा दयमेव भेदनिरूपणावसरः । तत्रच प्रतिपाद्यस्य भावनाभेदस्या पूर्वभेदाधीनत्वात् अपूर्वस्यच साक्षाद्भावनाजन्यत्वाभावेन द्वारीभूतधात्वर्थादि-जन्यत्वप्रतीतेः तद्भेदादेव भेदोवसीयते, नान्यथा, व्यापकाभावे व्याप्याभावस्य नियतत्वात् । धात्वर्थादीनांचा पूर्वजनकता फलकरणत्वाधीनेति प्रथमं फलसम्बन्धएव किं धात्वर्थस्य, उत सोमादिद्रव्यस्येति विचार्यते ।

यद्यपिच "व्रीही नवहन्ति, व्रीहीन्प्रोक्षति" इत्यादेः द्वितीयैव व्रीह्यादेः कर्मत्वावधारणात् परिशेषेणैव धात्वर्थस्य करणत्वावगते, "दध्ना जुहोति" "दध्नेन्द्रियकामस्य जुहुयात्" इत्यादेश्च होमस्य प्राप्तत्वेन अविधेयत्वात् विधेयस्य गुणस्यैव करणत्वावगते स्सन्देहाभावेन नोदाहरणत्वम्; अतएव एतदधिकरणापवादभूते-'तानि द्वैध" मित्यादौ इन्द्रियकामाधिकरणेच तयो रुदाहरणत्वमेव; तथापि "सोमेन यजेत" "सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम" इत्यादौ किं सोमादीनां फलभावनाकरणत्वं उत धात्वर्थस्यैव तदिति विचार्यते ।

अत्रच – अपूर्वभेदोपयोगिचिन्तनस्य पादार्थत्वा दपूर्वभेदस्य चाध्यायार्थभूत भावनाभेदफलत्वात् पादाध्यायसंगती स्पष्टे । अनन्तपादेतु स्रुवाद्यवदानानां कार्यविशेषे निरूपिते संप्रति स्वर्गादिरूपकार्यस्य करणविशेषनिरूपणा द्रष्टव्या । एतद्विचारोपोद्घातत्वेनापि किं सर्वेषामेव फलभावनाकरणत्वं, उत इतरपदार्थविशेषितस्यैकस्यैवेति चिन्तनीयम् ।

तत्र प्राथमिकभावनासम्बन्धस्य हि तावत्सर्वेषामेव पदानां विश्रान्तितोपि सम्मतत्वात् पाष्ठिकः फलान्वयोपि सर्वेषामेवा गुणप्राणविशेषाया इत्युचितो नाथैकस्यैव फलान्वय इतरेषान्तु तदर्थ-

त्वमिति। नहि गृह्यते विशेषो यदेकस्यैव करणत्वं नेतरेषामिति, समानपदश्रुत्या धात्वर्थस्य कारकश्रुत्या सोमादीनामपि चाविशेषेण फलभावनाकरणत्वप्रतीतेः, सति सम्भवे प्रधानान्वय[बाधस्या]न्य न्याय्यत्वाच्च। एकस्य फलान्वयिनः फलगुणान्वये वैरूप्यस्य मत्वर्थ-लक्षणाया वा प्रसंगापत्तेश्च। अतश्च सर्वेषां फलसाधनत्वादेकेनापि वाक्येन तत्तत्करणभेदभिन्न भावनाविधानोपपत्तेः सत्रे एकै-कस्य फलभोक्तृत्ववदेकैकस्य प्रत्येकमेव फलसाधनता, तावत्फलार्थं नस्तु सह प्रयोगेऽपि नक्षतिरितिकेचित्। भिन्नप्रयोग विधिविहितानां सहप्रयोगे प्रमाणाभावेन एका[र्थानेक]र्थत्वेन काम्यकर्मणामिव विकल्पएवे त्यन्ये। वस्तु तस्तु द्रव्यक्रियादिरूपेणकरणानां भेदेऽपि तेषां परस्प-रसापेक्षत्वात् भावनाभेदकत्वानुपपत्ते रेकस्यां च भावनायां तृती-यादि बलेन करणानां नैरपेक्ष्यावगमेऽप्य रुणैकहायन्योरिव द्रव्यक्रिययोः परस्परापेक्षत्व स्वाभाव्येन तृतीयाद्यवगत नैरपेक्ष्यस्य चोपादेयतावत्कार-णातिरिक्त विषयत्वाभ्युपगमात् दर्शादिवच्चैकपदोपादानाभावे ऽप्येक वाक्योपादानात् साहित्यप्रतीते स्तस्यचोपादेयगतत्वेन विवक्षितत्वा त्समुच्चित साधनत्वाभावेऽपि साधनानां समुच्चयोपपत्तिरिति प्राप्ते-

अनेकादृष्टकल्पनापत्ते र्न सर्वेषां फलसम्बन्धः। तथाहि-फल तद्भावनाभेदांगीकारे तावत्पक्षद्वये ऽप्यदृष्टभेद स्स्पष्टएव। भावनैक्यांगी-कारेऽपि तावपि परमापूर्वैक्ये तत्त त्करणजन्योत्पत्त्य पूर्वभेदावश्यंभावा दनेकादृष्टकल्पना। नच-करणानां परस्परसापेक्षत्वेन क्रमिकाया भावा देकमेवोत्पत्त्यपूर्वं कल्प्यतामितिवाच्यम्, तृतीयादिनावगतस्या न्योन्य निरपेक्षकरणत्वस्य कार्यनिरूपितत्वावश्यंभावात् फले फला पूर्वे वा तदसम्भवेनोत्पत्त्यपूर्वं निरूपितत्वावगते स्तद्भेदस्या परिहार्य त्वात्। अत एव दधिपयोयागयोः क्रमिकत्वाभावेऽप्युत्पत्तिवाक्यावगत नैरपेक्ष्यबलादेवोत्पत्त्य पूर्वभेदांगीकृतः श्रीगुरुचरणैः। अतोनेकादृष्ट

रूपत्वंवा, जन्यत्वमात्रंवा, संस्कारकत्वंवा ? नाद्य , तथा सति यागस्यापि फलजनकत्वावश्यम्भावात् तस्यचापूर्वमन्तरेणानुपपत्तेः । नहि यागसो-मयो रेका पूर्वजनकत्व सम्भवति । अपूर्वस्य शक्तिरूपत्वेन शक्तिमद्भेदे भेदस्यावश्यकत्वात् । नद्वितीयः, यागानुष्ठानस्य निष्प्रयोजनत्वापत्तेः । नह्यस्येन्द्रियकामादिहोमव त्प्रयोजनान्तर क्लृप्तमस्ति । अतश्च तस्य फलान्तरकल्पने पुनरदृष्टान्तरकल्पना तदवस्थैव । नापितृतीयः , यागस्यावघातादिव त्संस्कारकत्वायोगेन प्रोक्षणादिव दृष्टद्वारकत्वा-वश्यम्भावात् । अतश्च यागस्यफलसम्बन्धे तस्मादेवापूर्वं । सोमादेस्तु सत्यपि प्राथमिके भावनाकरणत्वे पाष्ठिकफलसम्बन्धांगीकारे अपूर्वा-न्तरकल्पनापत्ते दृष्टविधया यागसम्बन्धएव पाष्ठिकोंगीक्रियते, तेन दृष्टकल्पना लाघवार्थं धात्वर्थस्यैव फलसम्बन्ध ।

अयमेवत्वार्थो धातूपपदार्थस्वरूपनिरूपणद्वारेण[मुखेन]सूत्रकृतोक्त । ये[१]षामुच्चारणएव स्ववाच्ये[स्ववाक्ये]निष्पन्नरूपस्योपलब्धि तानि ना-मानि, तस्मात्तेभ्यस्साधनाकांक्षा,परा दूरे,नास्तीतियावत् । तदुच्चारणकाल एव तदर्थानां सिद्धत्वमतीते स्त स्साधनत्वेन यागादिविधानं नदृष्टविधयोपयुज्यत इत्यदृष्ट कल्प्यम् । येषान्तूत्पत्तौ उच्चारणकाले, स्वेर्थे-प्रयोगोनविद्यते स्वार्थोनविद्यतइतियावत्, तान्याख्यातानि, तस्मात्तदर्थेभ्यो निष्पन्नरूपत्वेन प्रतीयमानेभ्य स्साधनाकांक्षा झटिति प्रतीयेत । अतस्तत्साधनत्वेन विधीयमान सोमादि दृष्टविधयैवो पयुज्यत इति अनेकादृष्टकल्पनाभावा द्धात्वर्थादेव फलमिति भावः ।

ननु - सम्भवत्यपूर्वाख्या वान्तरव्यापारद्वारा फलकरणत्वे क्रियारूपाश्रय स्वाप्यत्व विना फलकामनायां सत्यां स्वतएवा पू-र्वोत्पत्तिद्वारा फलोत्पत्तिप्रसंगेन विधिवैयर्थ्यप्रसंगात् आश्रयाकांक्षो पपत्ते राश्रयस्यापि गुणनिष्ठ कृति फलजनकतानिर्वाहकत्वेन दृष्ट-विधयैव इन्द्रियकामहोमव त्फलान्तराभावेपि सोमाद्यंगत्वोपपत्ते नां-नेकादृष्टकल्पना, सत्यामपिवा नेकादृष्टकल्पनायां सत्यपिच गुणनि-

ष्टकार्यतानिरूपित यागनिष्ठ करणत्वकल्पनाकृते गौरवे सोमादीना-मपि भावनावच्छेदकत्वा विशेषा त्प्रथमसूत्रोक्त धात्वर्थस्यैव भावना वच्छेदकत्व नैवोपपादित,इत्यत आह -

१ – सू . अश्रितत्वा त्प्रयोगस्य ॥ २ - १ - १ ॥

यद्यपि ताव त्प्राथमिकभावनासम्बन्ध वेलाया सोमादे रपि करणत्वमविशिष्टम् । तथापि पार्ष्ठिकः फलसम्बन्धो य-द्वृत प्राथमिकभावनासम्बन्ध बोधकप्रमाणबलादेव तस्यैव वक्तु मुचितो नान्यस्य धात्वर्थस्य । तथाहि – यद्यपि तावत्सोमा-देः करणत्व श्रुत्या, लक्षणयाच धात्वर्थस्य । तथापि प्रत्ययार्थस्य भावनाया प्रकृत्यर्थ प्रति "तयोस्तु प्रत्यय' प्राधान्येने' ति स्मृत्या प्रा-धान्यस्या नुशासितत्वात् व्रीही नवहन्तीतिवत् प्राधान्येऽ्ङ्गत्वे या-गस्य श्रुत्यैव तदङ्गत्वोपपत्ति ।

नच – प्राधान्यस्यानुशासनेपि प्रत्ययस्य भावनामात्र एव शक्तिक-ल्पनेन तत्प्राधान्यस्य लक्षणादिनापि भानोपपत्तौ तत्र शक्त्यकल्प-ना च व्रीही न वहन्तीतिव त्प्राधान्यस्य श्रौतत्वेनांगस्य श्रौतत्वमिति वाच्यम् । सत्यपि प्राधान्यस्य लाक्षणिकत्वे परिपूर्ण पद पदान्तरे-णान्वेतीति न्यायेन सोमादिपदाना भावनापदान्वये तस्य परिपूर्ण-त्वापेक्षणाद् अतः पूर्वमेव यागादेरंगत्वावगते तदुत्तरभाविनः सो-माद्यगत्वस्य दौर्बल्यात् । अतश्च यथैवाग्नेयादिवाक्ये ऽष्टाकपालादीनां करणत्वस्य लाक्षणिकत्वेपि उपजीव्यत्वेन पूर्वभावित्वा तदुत्तरभावि श्रौ-तमपि व्रीहिभिर्यजेते त्यादौ व्रीहीणां करणत्व परम्परासम्बन्धेनैव निर्वाह्यते, एवं सोमादे रपीति सिद्ध धात्वर्थस्यैव फलसम्बन्ध स्तो-मादीनां तदर्थतेति । प्रयोजनतु उभयो फलसम्बन्धपक्षे विहितयोः क्रियाद्रव्ययो रसम्भवे, याग्ये सङ्कल्पोत्तर नियमे तत. पूर्वमपि न

प्रतिनिध्युपादानं, उभयो रदृष्टार्थत्वेन प्रयाजादिवत् प्रतिनिध्यभावात् । प्रारब्धप्रयोगा परिसमापननिमित्तदोषपरिहारार्थन्तु यत्किञ्चिदनियत द्रव्यक्रियोपादानेन प्रयोगसमापन मिष्टमेव । नचैतावता तस्य प्रति निधित्वं, सदृशनियमे प्रमाणाभावेन प्रतिनिधित्वानुपपत्तेः । एवं सोमादेः फलसम्बन्धपक्षेपि तस्या दृष्टार्थत्वात् तदप[वादे]चारे न तत्प्रतिनिध्युपादानं । प्रक्रान्तसोमप्रयोगस्तु यत्किञ्चिदसदृशमपि द्रव्यं गृहीत्वा समापनीय एव । प्रधानाभावे कथं प्रयोगसमाप्तिः? शिष्ट गर्हणान्यथानुपपत्त्या प्रयोगसमाप्तिं प्रति कामनादिव स्प्रयोगप्रक्रमस्या प्यनुष्ठापकत्वस्य षष्ठे वक्ष्यमाणत्वेन प्रधानसत्त्वासत्त्वयो रकिंचित्कर त्वात् । नह्यत्र प्रधानफलं स्वर्गो यदुत्पद्यते, यत्प्रधानासत्त्वे नोत्पद्येते त्याशंक्येत, तस्यतु सांगादेवोत्पत्ते र्न तादृशे विषये उत्पत्तिसम्भवः ।

यत्तु नित्यस्थले प्रत्यवायध्वंसादि, तत्काम प्रधानाभावे नोत्पद्यतां; नत्वेतावता । शिष्टगर्हणान्यथानुपपत्तिकल्पित दोषपरिहारार्थं प्रयोगो न समापनीयः, प्रयोगारंभस्यैवानुष्ठापकस्य सत्त्वात्; अतो यत्किञ्चिद्द्रव्यमुपादाय प्रयोगसमापन युक्तमेव । नचैतावता प्रतिनिधित्वं, सदृशनियमे प्रमाणाभावेन तत्त्वानुपपत्तेः । सिद्धान्तेतु सोमादे रदृष्टार्थत्वेन युक्त स्त दपचारे प्रतिनिधिः ।

यत्तु मूले "श्येनोद्भिदादिपदानां नामत्वसिद्धिरपि विचारप्रयोजनम्, श्येनादिपदार्थस्य फलसम्बन्धे धात्वर्थसामानाधिकरण्या स म्भवा न्न श्येनादिपदानां नामत्वं, अतएव तद्विचारोप्यर्था देतदधिक रणोत्तरं द्रष्टव्य" इत्युक्तम् । तदनादरात् । तथाहि- न तावद्गुणविधित्व निराकरणार्थानां मत्वर्थलक्षणादिहेतूनां एतदधिकरणा त्पूर्वमसम्भवः, एतदधिकरणपूर्वपक्षिणोपि यागवता सोमेनेत्येवं मत्वर्थलक्षणाया विशिष्टविधिगौरवादेश्च सोमादिवाक्ये अवश्यांगीकार्यत्वेन तद्विधया उद्भिदादिवाक्ये उद्भित्पदार्थस्यापि यागरूपत्वांगीकारौचित्यात्

प्रकृत्वाच, तदा प्रश्नाक स्वर्यंजनानुभवसाक्षिकतया पच्यादौ प्रतीय-
मानस्य व्यापारसमूहस्य वाच्यावकल्पना मपह्नोतुम् । अतश्च सर्व
स्यापि फलानुकूलस्य यत्नादेः धातुनैवोक्त्या दाख्यातार्थत्वासम्भवेन
प्रत्ययवाच्यायाः धात्वर्थातिरिक्तभावनायाः असम्भव । नचैव तिङ-
र्थाभावः, फलव्यापाराश्रयस्यैव कर्मकर्त्रादिरूपस्य तिङर्थत्वात् ।
तत्रापि फलव्यापारयो धातुलभ्यतया दाश्रयत्वमेव लाघवा च्छक्य
तावच्छेदकम् । एव मेकत्वादिसंख्यापि तिङाद्यर्थ, वर्तमानादि
कालश्च लडाद्यर्थः, प्रवर्तनाच लिङाद्यर्थः । तत्र फल व्यापारं प्रति
विशेषण, कर्म च फल प्रति, कर्ता व्यापार प्रति, सख्या कर्तृ
कर्मविशेषण, कालादिकन्तु व्यापार एव, तथैवानुभवात् । अत श्च
सर्वत्र व्यापारविशेष्यक एव बोध. । नचैव " प्रकृतिप्रत्ययौ प्रत्य
यार्थ सह ब्रूत स्तयोस्तु प्रत्ययः प्राधान्ये ने " ति स्मृत्या प्रत्यया
र्थस्य प्राधान्यावगतेः कथं प्रकृत्यर्थस्य व्यापारस्य विशेष्यतेति वाच्य,
" भावप्रधान माख्यात " इति निरुक्तस्मृत्या भावशब्दवाच्यव्या-
पारस्य प्राधान्यावगते. , तस्य च " धात्वर्थ केवलः शुद्धो भाव
इत्यभिधीयत " इति वैयाकरणस्मृत्या धातुवाच्यत्वावगतेः , विशेष
स्मृत्यनुरोधेन सामान्यरूपायाः प्रत्ययार्थप्राधान्यस्मृते स्सुबादिविषय
त्वेन व्याख्यानात् ।

वस्तुतस्तु नेयं प्रत्ययार्थप्राधान्यस्मृति. प्रत्ययार्थत्वाव-
च्छेदेन प्राधान्यनियामिका, लिङसंख्यादेः प्रत्ययार्थत्वेपि प्रा-
धान्यानङ्गीकारात् । नापि प्रधानस्य सत प्रत्ययार्थत्वनियमपरा,
" सत्वप्रधानानि नामानी " ति स्मृत्या लिङसंख्यादिभ्योतिप्रधान-
स्यापि प्रातिपदिकार्थस्य प्रत्ययार्थत्वाभावात् । किन्तु यत्रैव प्रमा-
णान्तरेण सुबर्थस्य करणत्वादेः प्रातिपदिकार्थ प्रति प्राधान्यं प्रसि
द्धम् , तदनुवादमात्रमिय स्मृतिरिति नानया व्यापारस्य धात्वर्थत्वे
पि विशेष्यत्वाप्रतिबन्ध । एवच पचतीति यत्राख्यातस्थले एक

अयको विक्लित्यनुकूलो वर्तमानो व्यापारइति बोधः। पच्यत इति कर्माख्यातस्थलेच एकाश्रयका या विक्लित्ति स्तदनुकूला भावनेति। पचति देवदत्तः पच्यते तण्डुल इत्यादौ देवदत्ततण्डुलयोः प्रथमान्तयोः यथाक्रम माख्यातोपात्ताभ्यां कर्तृकर्मभ्या मभेदान्वयः। इतरकारकाणान्तु यथायोगं साक्षा त्परम्परासम्बन्धेन व्यापाररूपे धात्वर्थ एवान्वय इति ध्येयम्।

चैत्रेण स्थीयत इत्यत्र भावाख्यातेतु कर्तृकर्मणो रप्रतीतेः संख्याऽनन्वितैव, धात्वर्थान्विता वा। नचैवं धात्वर्थस्य द्वित्वादि विवक्षायां द्विवचनाद्यापत्तिः, अनुशासनबलेन एकवचनस्यैव साधुत्वात्। यत्तु उष्ट्रासिका आस्यन्त इति भावेपि बहुवचनं, तद्भावकारवचना दत्रैव साध्वित्यवगन्तव्यम्। अतश्च क्वचिद्प्याख्या तस्य भावनावाचित्वाभावात् कथं तस्या समानपदश्रुत्या करणत्वा वगति रिति चेन्न; — धातोः फले तदनुकूलव्यापारे च शक्तिकल्पनाया मपि धात्वर्थातिरिक्ताया आख्यातवाच्याया भावनाया अनपह्नवात्।

तथाहि - अनुकूलव्यापारो धात्वर्थ इति वदतोनुकूलार्थं किं जनकत्वमात्र मभिप्रेतं? प्रयोजकत्वसाधारणं वा?

नाद्यः, विक्लित्तिरूपफलजनकीभूत शरीरगतक्रियाविशेषजनक स्यात्मगतस्य प्रयत्नादे स्तपक्षीणस्य फलाजनकत्वेन असंग्रहापत्तेः। नच तस्य पचतीत्यतो ननुभवादेव तदसंग्रहोप्यदोषः, पचति पाके यतति इत्येवंविधविवरणा देवानुभवस्या पह्नोतु मशक्यत्वात्।

नद्वितीयः, कृष्यादीनामप्यत्यन्तव्यवहितानां विक्लित्ति प्रयोजकत्वेन संग्रहापत्तेः। नच फलकारण तत्कारणीभूतव्यापारयो रेव ग्रहणमित्यत्रापि किंचिन्नियामक मस्ति, उभयप्रवेशस्य गौरवग्रस्तत्वात्।

न च फलानुकूलत्वस्य शक्यतावच्छेदकत्वानङ्गीकरणात् यत्न त्वाधस्सन्तपनत्वादीनां तत्त्वेन शक्यतावच्छेदकत्वाङ्गीकारात् यावत्सु व्यापारेषु पचे प्रयोगप्रतीतिः तावतामेव वाच्यत्वकल्पना इतिप्रसङ्ग इति वाच्यम्, एवं तर्हि पचति पाके यतते पाकं करोति पाकं भावयती त्यादिविवरणाद्यत्नादीनां पाकात्पृथक्करणेन यत्नादीनां पचौ संग्रहानुपपत्तेः ।

न च यत्नादिसमभिव्याहृतपच्यादेः फलमात्रबोधकत्वकल्पनादेव व्यापारस्य पृथग्विवरणोपपत्ति रिति वाच्यम्, तथात्वे व्यापारबोधक सामग्रीतो व्यापारबोधप्रसक्तौ तद्बोधं प्रति यत्नादिसमभिव्याहारस्य प्रतिबन्धकत्वकल्पना गौरवापत्तेः । तिबादिसमभिव्याहृतधातुत्वस्यैव व्यापारशक्ततावच्छेदकत्वकल्पने च कार्यकारणभावद्वयकल्पनस्य शक्ततावच्छेदकगौरवस्य चापत्तेः । यत्नादिसमभिव्याहृतधातुतः व्या पारानुभवापलापापत्तेश्च ।

न च विवक्षितस्यैव कारकव्यापारस्य पचिनोपादानात् यत्नादी नां विवक्षाविरहादेव पृथक्करणोपपत्ति रिति वाच्यम्; देवदत्तः पचति देवदत्तः पाके यतते इत्यत्र देवदत्तनिष्ठयत्नादेः विवक्षावश्य म्भावात्, अन्यथा भवन्मते धातूपात्तव्यापाराश्रयत्वाभावात् देवदत्तस्य प्रथमान्तत्वानुपपत्तेः । न च देवदत्तनिष्ठव्यापारान्तरविवक्षया तदुप पत्तिः, तथा सति पचतीत्यत्र भवन्मते यत्नबोधकशब्दाभावेन विवर णवेळायां यत्नानुवादानुपपत्तेः ।

अतो वाच्य पचतीत्यत्र भासमानोऽपि यत्नादिः न पच्यर्थ इत्यभ्यु पगन्तव्यम् । कस्तर्हि पच्यर्थ इति चेत्? फलावच्छिन्नो व्यापार विशेष एव, यो वस्तुतः फलजनकः । फले तज्जनकव्यापारविशेषे च त्वदुक्त रीत्यैव वा अतिरिक्ता शक्तिः, तयोस्तु जन्यजनकभाव स्संसर्गबल- लभ्यः । अस्मिंश्च पक्षद्वये द्वितीयार्थः फलाश्रयत्वं, न तु फलमपि, तस्य धातुनैव लाभात् ।

अथवा व्यापारविशेषएव धातोश्शक्तिः, नतु फलेपि, गौरवात् ; द्वितीयायास्तु फलमर्थः, नत्वाश्रयत्वमपि, तस्य प्रकृतिप्रत्यय समभिव्याहारादेव बोधोपपत्तेः ; नन्वेवं त्यजिगम्योः पर्यायत्वापत्तिः, संयोगानुकूलं हि कर्म गमेरर्थः, विभागानुकूलंत्यजेः, तथाचकर्ममात्रं धात्वर्थः फलसामान्यं च द्वितीयार्थः तदात्यजिगम्योः पर्यायत्वापत्तिः, तथा च ग्रामंगच्छतीति वक्तव्ये ग्रामंत्यजतीति प्रयोगापत्तिरिति चेत् ? गमिधातु समभिव्याहृत द्वितीयायाः संयोगरूपफलविशेषबोधकत्वं त्यजि समभिव्याहृतायाश्च विभागबोधकत्वमिति व्युत्पत्तिकल्पनेन उक्तातिप्रसंग निरासात् ।

वस्तुतस्तु विजातीय फलानुकूलताव च्छ्यापारविशेषनिष्ठा फलानुकूलान्तिमव्यापारनिष्ठाया पाकत्वादिजाति रखण्डोपाधिरेव वा तत्तत्फलजनकतावच्छेदकतया सिद्धा तत्त द्धातुशक्यतावच्छेदिका सती तत्त द्धात्वर्थः । एवं कर्मत्वकर्तृत्वादिकमपि क्रियाजन्यफलशालित्वादि समनियतं जातिरूप मखण्डोपाधिरूपं वा सामान्यमंगीकृत्य तस्यैव द्वितीयार्थतावगन्तव्या । अतएव व्यासज्यवृत्तिकर्तृत्वं देवतात्वंचेति सिद्धान्तोपि संगच्छते, अन्यथा आश्रयभेदेन कृति व्यक्तिभेदस्यावश्यकत्वात् कर्तृत्वैक्योपपादनानुपपत्तेः । तस्य च सम्बन्धिकत्वांगीकारात् निरूपकापेक्षायां करणादिना निरूपकेणान्वयोपि नानुपपन्नः । अस्मिश्च पक्षे फलानुकूल व्यापारार्थकेषु पच्यादिषु प्रयोज्य व्यापाररूपस्य फलस्य नावश्यं शब्देनैव भावनापेक्षा, पाकत्वादिसमनियतस्य विक्लित्यनुकूलत्वादिधर्मस्या क्षेपेणैव भानोपपत्तेः । एवं प्रयोज्यव्यापाररूपफलवाचिष्वपिधातुषु भवति विक्लियतीत्यादिषु वाच्येन विक्लितित्वादि सामान्येन स्वसमनियतस्य प्रयोजक व्यापारजन्यत्वस्याक्षेपेणैव बोधोपपत्ते र्न तदंशे शब्द व्यापारकल्पना युक्ता । अतएव भयत्र विवरणेन नियमेन तेषामुल्लेखः । नहि पचतीत्यस्य विक्लित्या विक्लियतीत्यस्य वा कृत्या विवरणं क्वचि न्नियतं दृश्यते । तत्तद्धातो-

ऽप्रयोजकव्यापारयो रन्यतरवाचिषु धातुषु इतरप्रतीति राक्षेपेणैवेति न तस्मिन्नपि शब्दव्यापारकल्पनावसर । अत एवोक्तं वार्तिककृता “ कदाचि दभिधीयमानकर्मांशकृत्याक्षिप्तप्रयोज्यव्यापारं स्वयमाक्षिप्त प्रयोज्य व्यापारं च प्रयोजकव्यापारमात्रं विवक्ष्यते, घटं करोत्योदनं पचतीति कदाचि दाक्षिप्तप्रयोजकव्यापारं प्रयोज्यव्यापारं मात्रं घटोभवति विक्लद्यन्ति तण्डुला ” इति । तत्सिद्ध फलानुकूल यावद्व्यापारविशेषवर्ति अन्तिमव्यापारवर्तिवा पाकत्वयागत्वादिजातिरखण्डोपाधिर्वा तत्तद्धातुशक्यतावच्छेदक शक्तावच्छेदकं च तत्तद्धातुत्वमिति । अतश्च फलानुकूलव्यापारसमूहस्य पच्यर्थत्वेपि तदनुकूलस्य यत्नादेर्धात्वर्थ त पृथक् क्रियमाणस्य धात्वर्थत्वायोगात् विवरणवेलायाश्च भासमानस्य भानकारणजिज्ञासाया धातोरन्यत्रव्यापृतत्वात , पारिशेष्यात् तिबादेरेव तद्बोधकत्वमिति निश्चीयते । तत्र पचति पाकं भावयती ति अनुकूलव्यापारवाचिणिजन्त भूधातुना विवरणात्तत्प्रादकत्वयथास्वानुकूलव्यापारस्य तिङर्थो ननु यत्नमात्रं रथो गच्छतीत्यादौ रथे यत्नासम्भवेन अव्याप्यकत्वात । अत स्ववसाधारण्यना नुकूलव्यापार एव तिङर्थं । नच पाकं करोतीति यत्नार्थकेन कृञा विवरणात् तिङोपि यत्नार्थकत्व करोतेर्भावयति पर्यायत्वेन यत्नार्थकत्वासिद्धे । यथैवहि घटोभवतीत्यादौ भवनकर्तृत्वं प्रतिपन्नस्य घटस्य तत्परो भावयतीत्यादौ भावयतिकर्मत्वं, एवं तत्परं करोतीत्यत्र करोतिकर्मत्वमपि । अतश्च भवत्यर्थं कर्तृकर्मत्वाविशेषात् करोतिर्भावयति पर्यायो नयत्नार्थक । अतएव रथो गच्छतीत्यत्रापि करोतिना विवरणमविशिष्ट ।

किंच यत्नार्थकत्वे करोते र्यततेरिव अकर्मकत्वापत्ति । अतश्च सकर्मकाकर्मकत्वरूपधर्मभेदान्न करोतिपत्यो पर्यायत्व, अपितु भावयति पर्यायत्वमेवेति, - तद्विवरण मप्यनुकूलव्यापारवाचित्वपक्ष तिङ्, स्साधकम् ।

यत्तु पचति पाकं पचते इत्येव पचेर्विवरणं, तत् लाक्षणिकम् , समाहकलाघवानुरोधेन अनुकूलव्यापारे शक्तौ गृहीतायां पचत्वेन तद्बोधस्य लक्षणयांगीकारात् । यच्च सामान्यवाचकस्य पदस्य लक्षणयापि कश्चिद्विशेषपरत्व, नतु पचादिविशेषवाचकस्य व्यादिनिष्ठविशेषलक्षकत्व, जहत्स्वार्थलक्षणापत्तेः । अतोविक्लित्तिरूपफलोद्देश्यक- पाकानुकूलो व्यापारसमूहएव लिङर्थः । तत्रच सर्वानुगतस्यान्योत्पादक व्यापारत्वस्यैव शक्यतावच्छेदकत्वात् तेन रूपेणाख्याता द्बोधेपि ततद्विशेषरूपेण तत्तदितिकर्तव्यताविधिभ्यो बोधः स तेषामपि वैयर्थ्यमिति पार्थसारथिमतानुयायिन ।

वस्तुतस्तु तत्तज्जन्यभेदेन तत्तदुत्पादकभेदेनच व्यापारस्य भेदादेकशक्यतावच्छेदकाभावेन सर्वानुगतैकशक्तिकल्पनानुपपत्ते स्तत्तद्विशेषविषयकतत्तच्छक्तिकल्पनेच तत्तदितिकर्तव्यताविधीनां वैयर्थ्यापत्ते स्तेषां तात्पर्यग्राहकतांगीकारेच अनेकशक्तिकल्पनस्य तावदवश्य भावात् लाघवादेकैव शक्ति रन्येषा लक्षणादिना विध्यन्तरेण वा बोध इत्यंगीक्रियते । नच क्व शक्ति क्व लक्षणेत्यत्र नियामकाभाव , पचति पाकं पचते पाकं करोतीत्यादिविवरणस्यैव यत्र शक्तिग्राहकत्वात् । नच समाहकलाघवानुरोधेन अनेकशक्तिकल्पना युक्ता, गगापदस्यापि तीरे तदापत्ते. । यत्रापि गुरुभूतैक शक्यतावच्छेदकानुरोधेन एकशक्तिकल्पन, तत्रापि लघुभूतैकशक्यतावच्छेदकसम्भवे समाहकलाघवार्थं गुरुभूतावच्छेदकांगीकरणमन्याय्यमेव । उपाधीनामवच्छेदकमतौ गुरुत्तरमतीतिकत्वेन तत्निष्ठगौरवस्य फलमुखत्वेना प्रामाणिकत्वात् । अतश्च पचत्वस्य जातिरूपत्वेन लघुत्वाच्छक्यतावच्छेदकत्व । नच पचत्वेन रूपेणभानाभाव, पचतिपाकंपचते पाकंकरोतीति विवरणस्यानुभवविरोधात् ।

यत्तु कृञो नपचार्थकत्व, भावयतिपर्यायत्वादित्युक्त, तन्न, भारुपातवत् करोतेरपि यत्नार्थकत्वस्यैव लाघवेनांगीकारात । नच हा

ञ्जतावच्छेदकस्य यत्ना प्रतीयमानस्य तथापि तु प्रश्वासवायौ स्पन्दं करोति यत्नार्थकत्व, प्रयत्नाभावे वातरोगादिना स्पन्दमाने चैत्रे स्पन्दानुकूलविजातीयवायुसंयोगरूपव्यापारेऽप्यपि नायं स्पन्दं करोतीति प्रयोगदर्शनात् यत्नार्थकत्वप्रतीतेः कर्मोपाजन्यत्वाविशेषेऽपि यत्नजन्यत्वाजन्यत्वाभ्यामेव घटाङ्कुरयोः कृताकृतव्यवहारदर्शनाच्च । अथ वर्जिताङ्कुरं कृतं रथो गमनं करोति स्थाली पाकं करोतीत्यादौ अचेतनेऽपि प्रयोगात् अनुकूलव्यापारवाचित्व, उभयविधव्यवहारस्यैव शक्यतावच्छेदकलाघवस्यैव नियामकत्वात् । अचेतने कृञःप्रयोग व्यवहारस्तु अनुकूलव्यापारे लाक्षणिकः । अत एव चैत्रस्य प्रतीतावपि शोभनः पाकं करोतीत्यादौ शोभनाश्रितः पाकानुकूलो यत्न इत्येव प्रतीयत इति केचिदुक्तम् । अतो यत्न एव कृञर्थः ।

यत्तु कृञो यत्नार्थकत्वे यतते रिवाकर्मकतापत्तिः । फलव्यधिकरणव्यापारवाचकत्वं हि धातोः सकर्मकत्वम् । यथा - पचादौ, फलस्योदननिष्ठत्वात् व्यापारस्य च देवदत्तादिनिष्ठत्वात् । अकर्मकेषु शयनासनादौ क्रियाफलयोः ऐकाधिकरण्यात् न सकर्मकत्वम् । अत एव यत्नजन्यफलस्य कर्मण्यभावादेव यतति रकर्मकः, तथैव कृञोऽपि स्यात् । अथ ज्ञानजन्यस्य ज्ञाततारूपफलस्येव कृतिजन्यस्योत्पत्तिरूपस्य तस्य कर्मणि स्वीकारात् ज्ञाधातुवदेव कृञोऽपि सकर्मकत्वं तर्हि यतते रपि तदापत्तिः । यतश्च देवदत्तेन क्रियते घट इतिवत् यतति धातोरपि कर्मणि लकारापत्तिः । यतति घटं कृञोऽपि सहनापत्तिः । घटं करोतीत्यादौ घटे द्वितीयानापत्तिश्च । कृञश्च कर्मकत्वाङ्गीकारे "कर्मवत्कर्मणा तुल्यक्रियः" इत्येतत्सूत्रविहितस्य यगात्मनेपदे क्रियते घटः स्वयमेवेत्यनापत्तिश्च । तद्वदेव या यततेरपि तदापत्तिरित्युक्तम् ,- तन्न, वस्तुतो यः फलव्यधिकरणो व्यापारस्तद्वाचित्वं धातोः सकर्मकत्वमभिप्रेतं किंवा फलव्यधिकरणत्वेन व्यापारवाचकताऽभिप्रेता ?

स्याच्, पच्यादेरपि फलाविवक्षया अकर्मकत्वाङ्गीकारात् तत्र फलव्यधिकरणत्वस्य धातुत स्वरूपत्वा दतिव्याप्तिः । न च वैवक्षिक कर्मकत्वसत्त्वेऽपि स्वाभाविकाकर्मकत्वानङ्गीकारात् स्वाभाविकसकर्मकत्वलक्षणाव्याप्तिरिति, एवमपि पतत्यादौ स्वाभाविकाकर्मके उत्पत्तिरूपस्य फलस्य व्यधिकरणत्वेनातिव्याप्तेरनिवारणात् ।

न च धात्वर्थभूतफलसामानाधिकरण्यवैयधिकरण्ये एव साम्ययो लक्षे, उत्पत्तिश्च न पतते रर्थोऽपितु फलसमानाधिकरणक्रियैवेति वाच्यम्, तथा च करोतेरपि उत्पत्तिवाचित्वेन फलभेदापत्त्या उक्तदोषानुषङ्गेन यत्[फल]वाचित्वे बाधकाभावात् । आसनशयनादीनामपि कालादिकर्मयोगेन स्वाभाविकसकर्मकत्वस्य वैयाकरणैरुक्ते मास इत्यादिप्रयोगसिद्ध्यर्थं मासाकृतत्वात् अत्र च फलव्यापारयोरेकनिष्ठताया दुर्लक्षणत्वाच्च ।

अत एव न द्वितीयोऽपि, फलव्यधिकरणत्वस्य धातुस्वभावत्वस्वीकारेण वाच्यतावच्छेदके गौरवाच्च । अतो नैव सकर्मकाकर्मकयोर्निरुक्तिः । किन्तु अविवक्षाविरहविशिष्ट कर्माकाङ्क्षधातुत्वं सकर्मकत्वम् । अस्ति चेदं घटं करोतीत्यादौ कुरोर्नियमेन विवक्षायाः सत्त्वात् कर्मपदसाकाङ्क्षत्वात् । ननु पर्यायत्वेऽपि यतते आकाङ्क्षायाः शब्दविशेषधर्मत्वेन पर्यायाणां बाधकत्वात् । अत्र यथैव कर्मत्वानित्येत स्पन्द नानयतिपदापेक्ष किन्तु समानार्थकानि द्वितीयैव त साकाङ्क्षा, तथा पर्यायवति छत्र एव कर्माकाङ्क्षा नैयतते । अत्र च कर्माविवक्षायां पच्यादेः कर्मत्वम विवक्षाविरह वैशिष्ट्याभावा दव्याप्तिः । आसनादीनां च कालादियोगविशिष्टानां कर्माकाङ्क्षत्वादविरुद्धं सकर्मकत्वम् ।

एव यत्र एव धातुरर्थान्तरे सकर्मकोऽर्थान्तरे चाकर्मक तत्रा प्येवस्यैव तत्तदर्थं प्रतिपादकत्वरूप धर्मद्वयस्वीकारेण कर्माकाङ्क्षात्व तदनाकाङ्क्षत्वे द्रष्टव्ये । यथा गृधातो प्रधनपरत्व प्रत्दगान

प्रकारताशालिबुद्धित्वावच्छिन्नं प्रति प्रथमान्तपदजन्योपस्थितिः कारणमिति नियमः कल्प्यः । तथाऽसौ लभ्यते, काष्ठैः पचति दध्नेन्द्रियकामस्य जुहुयात् इत्यादौ प्रथमान्तपदाभावेन व्यभिचारात् । प्रथमान्ताध्याहारेण तत्सम्पादनं, अध्याहारविशेषाऽनुशासनविरहे लक्षणाया लघुत्वेनाश्रयितेनैव कर्तृकर्मलक्षणौचित्याभावात् । नचात्र दध्ना जुहोतीतिवत् स्वर्गकामपदानुषङ्गः शङ्कितुं शक्यते, येन लक्षणातोऽपि लाघवं प्रकल्प्येत, इन्द्रियकामपदस्य तन्त्रापत्तेः । यत्तु वाक्यान्तरेणा-ध्याहृतः कर्ता लभ्यते, न तु पूर्वं प्रथमान्तपदोपात्तः, योऽनुभूयेत । अतो लक्षणैवाश्रयितव्या कर्तृकर्मणोः स्वर्गकामाभिन्नाश्रय इन्द्रादिपदानां । युक्तं चैतत् - लक्षणया स्वसमानपदश्रुत्यैव कर्त्रान्वयोपपत्तेः । इतरथा भिन्नपदोपात्तेनैवान्वये गौरवात् ।

किञ्च विभाव्यते मृगो धावतीत्यादौ महाभाष्यकाराभ्युपेतेऽध्याहारतायां लघुतापि प्रथमान्तविशेष्यकत्वेनावकल्प्यते । तथाहि न तावदत्र मृगस्य विभावनं प्रति कर्मत्वं, द्वितीयापत्तेः । नच द्वितीयान्तपदाध्याहारेण कर्माकाङ्क्षापूर्तिः, वाक्यभेदापत्तेः । अतो धात्वर्थभावनाया एव कर्मैव वाच्यम् । तच्च तदैवोपपद्यते, यदि तस्य मृगपदं प्रथमान्तपदान्वयः । अन्यथा खलु दुर्वारैवा-ऽन्यत्रान्वयानुपपत्तेः । भावनायाः प्रथमान्तं प्रति विशेष्यत्वे तु कर्म साकाङ्क्षेण तस्या विभावनभावनां प्रति अन्वयोपपत्तिः । नच तद्वारि तत्र द्वितीयापत्तिः शंक्या, स्वादिविभक्तीनां प्रातिपदिकपरत्वस्य नियतत्वेनाख्यातपरत्वाभावादनुपपत्तेः । नच मृग इत्यगतपदस्य नित्यानुषङ्गेण भवन्नपि साक्षात्कारकत्वविभावनकर्मत्वानुपपत्तेः कथं मेलक-व्यवहारोपपत्तिरिति वाच्यं, विभावनस्य साक्षात्कारघटितत्वाभावेन नित्यानुमेयधर्मत्वस्या प्युपपत्तेः । घटितत्वेऽपि भावनाश्रयत्व-कल्पनया प्रत्यक्षत्वेनैव विभावनकर्मत्वोपपत्तेः । अतोऽस्मन्मते एकवा

षेयत्वोपपत्तिरिति मुख्यविशेष्यैव भावना । एतेन भावनाया मुख्यविशेष्य त्वे पाकभावनाजायत इत्यस्मिन्नर्थे पचति भवतीति प्रयोगापत्तिरिति दूषणमिष्टापत्त्यैव निरस्तम् । अतएवोक्तं वाक्यपदीये "बहुष्वपि तिङन्तेषु साकांक्षेष्वेकवाक्यता" इति ।

किञ्च भवन्मते सर्वकारकाणां धात्वर्थे तस्य कालादेश्चभावनायां संख्याभावनयोश्च प्रथमान्तपदोपस्थाप्ये अन्वय स्वीकाराद्व्युत्पत्ति वैचित्र्यकल्पनापत्तिः । तद्वरं वक्ष्यमाणरीत्या सर्वेषां भावनान्वयांगीकारादेकैव व्युत्पत्तिर्युक्ताकल्पयितुम् ।

एतेन प्रथमान्तपदोपस्थाप्ये भावनान्वयानंगीकारेपि आख्यातलक्ष्यैकर्तरि कर्मणिवा तदन्वयइति न भावनाया मुख्यविशेष्यत्व मित्यपास्तं, व्युत्पत्ति वैचित्र्यसाद्वस्थ्यात ।

किञ्चास्मिन् पक्षे "भावप्रधानमाख्यातं" इति स्मृतिविरोधः । तथाहि – न तावदियं स्मृतिः भावशब्दवाच्य भावनाप्राधान्यं प्रकृत्यर्थापेक्षया विधत्ते, तस्य प्रकृतिप्रत्ययाविति स्मृत्यैवसिद्धेः । किन्तु यदाख्यातं शक्तिलक्षणासाधारण्येन भावनासंख्या कालकर्त्रादिपर तत्र भावनायाः प्राधान्यं, नतु कर्त्रादेरित्येवं परम् । अतएव "धात्वर्थः केवलःशुद्धो भावइत्यभिधीयत" इति व्याकरणस्मृत्या धात्वर्थस्यभाव परिभाषणेपि नास्यां निरुक्तस्मृतौ भावशब्देन तद्ग्रहणम् । तथासति धातोरेव भाव प्रधानत्वापत्त्या आख्यातशब्दस्य भावप्रधानत्वानुपपत्तेः । किन्तु णिजन्तस्य भुवोजन्तत्व व्युत्पन्ना आख्यातार्थभावनायाः । वैयाकरण परिभाषणन्तु तच्छास्त्र विहितकृत्यविषयं, न निरुक्तविषयमपि, तस्य परिभाषारूपत्वेनान्यत्राप्रवृत्तेः । तदपि च नपुंसके । भावेक्तइत्यादौ तुमुन्धात्वर्थ ग्रहणमेव नतु स्वकर्मभाव ग्रहणमित्येतदर्थम् ; नतु भावपद शक्यनियमार्थ, प्रवृत्तिनिमित्तादे स्तदनुपपत्तेः । नच "सर्वमाख्यातजंनामे" ति निरुक्तकारेणाभिधानात् आख्यातशब्देन धातु रेवोच्यतइति वाच्यं,

कृदन्तेधातौ चाख्यातपदप्रयोगाभावेन आख्यातपदस्य धातुवाचित्वानुपप त्तेः। निरुक्ते नामनिर्वचने चाख्यातशब्देन लक्षणयाख्यातान्तस्यधातोर्ग्रह णं नानुपपन्नम्। अतएव तान्याख्यातजानीति जैमिनिसूत्रेपि चाख्यातशब्दे न लक्षणया ख्यातान्तधातोर्ग्रहणम्। एतावांस्तुविशेषः, य जैमिनिसूत्रे आख्यातान्तत्वं विशेषणं, तेनतिङन्तस्यैवधातोर्ग्रहणं। निरुक्तेतूपलक्षणं, तेनतत्र तिङन्तधातुस्वरूपस्यैव। नत्वेतावता आख्यातशब्दस्यधातु वाचित्वं, कृदन्तेधातौ पाकइत्यादौ तत्पदप्रयोगाभावेन तद्वाचित्वानुप पत्तेः। अपितु तिङ्वाचित्वमेव। अत्र आख्यातप्रतिपाद्यानेकपदार्थ विषये कस्य प्राधान्यमितिजिज्ञासायां भावनाप्राधान्यमनया स्मृत्यानिय म्यते। एवं "सत्वप्रधानानिनामानि", इत्यत्रापि अनेकार्थप्रतिपादके षु प्रातिपदिकापरनामधेयेषु नामसुपाचकोलावकइत्यादिषु विभक्त्युपात्त संख्यान्वययोगिसत्वपदाभिधेयस्य कर्तुरेव प्राधान्यं नतु पाककृते रित्ययमर्थोवगम्यते। नामत्वाविशेषेपि च यत्र घटादिपदे घटघटत्वरूप योरुभयोरपि अर्थयोर्विभक्त्युपात्तसंख्यान्वययोगित्वरूपसत्वता तत्रोभयो रपि शब्दत प्राधान्यं। अतएव आकृत्यधिकरणेभिहितं "यत्तु[न]ती [त्या]यादौ जातेरेव संख्याकारकान्वयोन्यत्रतु लक्षितव्यक्तेः जातिव्यक्त्यो श्च नवैशिष्ट्यावगाहिकोबोधः। किन्तु बोधद्वयं शक्तिलक्षणाजन्य"मिति। अतस्तत्रोभयोस्सत्वभूतत्वादुभयोरपि प्राधान्यं। तदेवं आख्यातनाम सुप्सु अनेकार्थप्रतिपादकेषु अनया स्मृत्या प्राधान्यं नियम्यते। सुबादिषु त्वनेकार्थप्रतिपादकेषु प्रधानभूतक्रियान्वयित्वात्कारकादेरेवप्राधान्यम्। ननु लिङ्गसंख्यादेः। प्रधानभूतक्रियान्वयित्वं च क्रियान्वयित्वविरहे कारकत्वव्याघातात्। क्रियाया प्रधानत्वंच क्रियापदं विनाकारकाणां नैराकाङ्क्ष्यादर्शनात्। अतः प्रधानभूतक्रियान्वयित्वात् सुबर्थेकारका- देरेव प्राधान्यम्। लिङ्गसंख्यादेस्तु समानाभिधानश्रुत्या तदन्वयि त्वम्। तत्र "साक्षाद्योग्यमिति" पदश्रुतेर्योग्यतारूपलिङ्गाच्च पाठिकः प्रातिपदिकार्थे अन्वयइति प्रातिपदिकार्थस्यापि लिङ्गसंख्येप्रति प्रा

वस्तुतस्तु तथापि साक्षात्परम्परासाधारण्येन भावनायामेवान्वयः, प्रधानान्वयस्याभ्यर्हितत्वात् । धात्वर्थस्य तु भावनायामेवान्वयः, प्रकृत्यर्थत्वात् कारकत्वेन विवरणाच्च ।

किञ्च धात्वर्थस्याप्यत्र कारकत्वेनान्वयाभावे तृतीयान्तानां ज्योतिष्टोमादीनामनन्वयापत्तिः । न च धातुत्वयोः अभेदलक्षणायां वा तृतीयेतिवाच्यं, करणत्वरूप श्रौतार्थविवक्षायां कारणाभावात् । अभेदलक्षणायां वा तृतीयायाश्छन्दसि क्वाप्यदर्शनाच्च । धान्येनधनवानित्यादावपिच नधान्याभिन्नधनवानित्यर्थः, धान्यस्यधनसम्बन्धोत्पत्तिं प्रतिकरणत्वोपपत्तेः दण्डेनघटोभवतीतिवत् लक्षणायां प्रमाणाभावात् । अत एव भासमानोऽपि धनधान्याभेदः पार्ष्ठिकान्वयलभ्यएवेति न तदर्थमपि लक्षणा । अतोलक्षणायाः क्वाप्यदर्शनात् तृतीयान्तनामधेयानुरोधेनापि धात्वर्थस्य करणत्व मवश्यमङ्गीकर्तव्यं । अतएव धान्यकरणत्वस्य पदार्थविधयाभासमानत्वात् धात्वर्थस्यापि करणत्वं नसंसर्गमर्यादालभ्यं । अपितु धातुलभ्यमेव । अतश्च धात्वर्थो यागादिः करणत्वेनान्वेति । तच्चकारकत्वात् भावनायामित्यपि द्रष्टव्यम् ।

एवं लडादिवाच्यः कालोऽपि पार्ष्ठिकान्वयलभ्य धात्वर्थद्वारावा साक्षात्सम्बन्धेनैववा भावनान्वयी ।

एवं विधिरपि प्रवर्तनारूपः प्रधानभूतायां तस्यामेव भावनायामन्वेति जनकत्वसम्बन्धेन । संख्यायास्तु प्रतीत्यनुरोधात् अनुशासनानुरोधाच्च भावनाक्षिप्त कर्तृत्वकर्मत्वान्यतरयोगित्वं । भावनाहि कर्तृत्वकर्मत्वे अखण्डोपाधिरूपे आक्षिपति । तेच स्वाश्रयमाक्षिपतः । कर्तृत्व कर्मत्वयोश्चाक्षेपलभ्ययोरपि शाब्दत्वसिद्ध्यर्थं लक्षणा, नतु तदाश्रयस्यापि । सर्वंचैतत् विस्तरेण कर्त्रधिकरणे निरूपयिष्यते ।

तत्र शबादिविकरणस्थले तिङ्वाच्या संख्या कर्त्रान्विता । यगादिविकरणस्थले, क्वचित्कर्मत्वान्वितापि । नतुतदाश्रयान्विता,

तस्याशाब्दत्वात् । अतएव दर्शपूर्णमासादावाश्रयभेदेऽपि कर्तुरैक्यादेकवचनं । क्षौमेवसानावित्यत्र प्रमाणान्तरानुसारात् अधिष्ठानलक्षणामंगीकृत्य संख्यान्वय आश्रयएवेति विशेषः। अतस्संख्यायाः कर्तृकर्माख्यातस्थले तावत् तत्रैवान्वयइति मूलानुयायिनः ।

वस्तुतस्तु प्रधानान्वयस्याभ्यर्हितत्वात् सुप्[स्मृत्य]भिहित संख्याया इवास्या अपि पाष्ठिकान्वयलभ्य कर्तृत्वद्वारकः कर्मत्वद्वारकोवा परंपरासम्बन्धेन भावनायामेवान्वयः । भावाख्यातस्थलेतु भावनायामेवान्वयस्संख्यायाः। यथा चैत्रेणसुप्यते स्थीयते इत्यादौ । अत्रहि स्वापादिकृति स्थित्यर्थौ खण्डोपाधिरूपः कर्तृत्वन्तु तृतीयार्थः । अत एव चैत्रेणकिंक्रियते इति प्रश्ने सुप्यत इत्युत्तरंसंगच्छते । अतः प्रतीत्यभावात् नात्र कृति स्थित्यर्थइति परमत मपास्तम् ।अतस्तत्र भावनायां साक्षात्सम्बन्धेनैव संख्यान्वयः । नचैवं तस्याद्वित्वादिविवक्षायां द्विवचनापत्तिः, एकवचनस्यैव तत्र साधुत्वस्मृतेः तेनैव विवक्षितसंख्यालक्षणोपपत्तेः । नचैवं साक्षात्सम्बन्धेन विभक्त्युपात्तसंख्या योगित्वरूप सत्वतापत्तेः भावप्राधान्यानापत्तिः, सत्वतास्वीकारेऽपि भावत्वानपायात् । अस्यांहि स्मृतौ भावस्य प्राधान्यमिति नियमः क्रियते नतु सत्वातिरिक्तस्येति संख्यादेरपि प्राधान्यप्रसंगात् । अतो भावत्वानपायात् संख्यान्वयेऽपि न प्राधान्य क्षतिः । अस्तु वा कर्तृकर्मान्वयद्वारकधात्वर्थान्वयः पाष्ठिक स्संख्यायाः । अतो भावाख्यातस्थलेऽपि साक्षात्सम्बन्धाभावेऽपि धात्वर्थ द्वारैव भावनान्वयोपपत्तिः ।

यत्तु गगने न स्थीयत इत्यादौ यत्नस्य बाधः तत्र यत्नो भवतीत्यादौ प्रथमान्तपदान्वयस्यैवाश्रयत्वलक्षणायां कारणाभावात् धात्वर्थ एव संख्यान्वयो नन्वितताया होति केचित् ।

वस्तुतस्तु भावप्रधानस्मृत्या आख्यातत्वावच्छेदेन भावनाप्राधान्यस्य विहितत्वात् तदन्यथानुपपत्ति रेवाश्रयत्वलक्षणाबीजम् ।

एव धात्वर्थान्वये स्वविरुद्धत्व भविष्यति । इत्थञ्च अस्ति स्वावर्णं फलविशेष्यतार्थं इति व्युत्पत्तिविरुद्धत्वकल्पनापत्तेः । अस्मन्मते तु कृत्या व्यापारस्यापि घटं करोतीत्य इत्यादिरूपम् । कर्तृत्वकर्मत्वयो-स्तु भावनायां नैवान्वयः । तत्र कर्तृत्वस्य भावनायामन्वयो विवाद एव । कर्मत्वस्य तु कर्माख्यातस्थले प्रत्ययार्थेन विना यत्र प्रयोगस्य लक्षणात् तत्रान्वय इति गुरुमतानुयायिनः । एवं कर्मकर्तृ-स्थलेऽपि पच्यते ओदनः स्वयमेवेत्यादौ कर्मण एव व्यापारे कर्तृत्व-विवक्षया स्वरूपलक्षणा द्रष्टव्या ।

केचित्तु कर्माख्यातस्थले फलमात्मनेपदार्थः, न तु कृतिः, शायादिनाभिधानात् तिङ एव तत्र शक्तिग्रहात् । अत एव भाव-माना कृति पर तृतीयार्थः, ओदनस्तु फलव्यापारेत्याहुः । तत्र, लाघवेन सिद्धस्यैव शक्ततावच्छेदकत्वौचित्यात् ; ओदनान्वयार्थं फलस्य लक्षणयापि बोधोपपत्तेश्च । तृतीयाया अपि कर्तृत्वरूपा खण्डोपाध्यावेव शक्तिर्न तु कृतौ । तथात्वे तत्रापि धात्वर्थान्वयापत्तेः ।

वस्तुतस्तु कर्माख्यातेऽपि न फललक्षणा, कृतावेवाखण्डरूपस्य कर्मत्वस्य स्वसमानाधिकरणफलप्रयोजकव्यापारसम्बन्धेनान्वयाङ्गीका-रात् । अत एव कर्मकर्त्राख्यातस्थलेऽपि कर्मत्वरूपाखण्डोपाधे-रविवक्षणात् कर्तृत्वरूपाखण्डोपाधेरेवौदननिष्ठस्य उक्तपरम्परा-सम्बन्धेन कृतावन्वयोपपत्तेर्न फललक्षणा । नचैव एतादृशस्थले देवदत्तस्य साक्षात्सम्बन्धेन प्रथमानापत्तावपि तृतीयापत्तिः स्या-देवेति वाच्यं, देवदत्तनिष्ठकर्तृत्वस्य तिङानभिधानेऽपि कृतिनिरूपि-तकर्तृत्वस्य तिङभिहितत्वात् अनभिहिताधिकारविहिततृतीयाया आ-पादयितुमशक्यत्वात् । नच प्रथमैव तर्ह्यापद्येत, प्रथमायाः स्तिङ्-समानसम्बन्धवाचित्वस्याभावेन व्याप्त्यभावे आपादयितुमशक्य-त्वात् । अत स्वसम्बन्धसामान्यवाचिनी षष्ठ्येव तत्र युक्ता ।

तदेवं सर्वकारकाणि प्रति भावनायाः प्राधान्ये तिङुपात्तकर्त्रादि प्रतितुतरां प्राधान्यापत्तेः, तदनंगीकारे भावप्रधान माख्यातमिति स्मृतिविरोधस्य दुष्परिहरत्वा द्भावनाया एव मुख्यविशेष्यत्वमिति सिद्धम् ।

अतएव भावप्राधान्यस्मृत्या भावनायाः प्राधान्यावगमात् अ-प्रधानभूतयोः कर्तृकर्मणो स्तल्लक्ष्यत्वम् । अन्यथा ते कृदन्तवदेव त-द्वाच्ये स्यातां नतु तल्लक्ष्ये । तथाहि- यत्रैकस्मात्पदादनेकार्थ प्रतीति स्तत्रानेक शक्तिकल्पनागौरवभिया एकत्रैवशक्ति रपरत्रलक्षणेति अ-वश्य मभ्युपगन्तव्यम् । तत्र च नियामकापेक्षायां प्रथमं तावत्प्रधा-नस्य लोकेवेदेच गुणभूताक्षेपकत्व दर्शना त्प्राधान्यमेव शक्तिनिया-मक मवसीयते । तदिह भावनायाः प्राधान्यपक्षे तदपेक्षितयोः गुणभूतयोः कर्तृकर्मणो राक्षेपेणैव बोधोपपत्ते र्नातिरिक्तशक्तिकल्प नावसरः । अत एव यत्र व्यभिचारान्नाक्षेपकत्वशक्तिः, यथैकत्वादौ, तत्रानेक शक्तिकल्पनमपि । यदितु तयोरेव प्राधान्यं तत स्तयो रेव शक्यत्वापत्ते र्भावनाया श्च गुणभूताया स्ताभ्यामेवाक्षेपसम्भवा न्न तस्या वाच्यत्वं युज्यते । अत एव कृदन्तस्थले पाकः पक्त मित्यादौ पचिधातोः पाकमात्रवाचित्वेपि प्रत्ययस्य कृतिकर्त्रादि रूपानेकार्थबोधकस्य क्व शक्तिरिति नियामकापेक्षायां सत्त्वप्रधा नानि नामानीति सत्त्वरूपस्य कर्त्रादेरेव प्राधान्यावगमात् तत्र श-क्तावधारितायां गुणभूतायाः कृते राक्षेपेणैव बोधोपपत्ते र्नाति रिक्तशक्तिकल्पनम् । नचैवं तस्या मशाब्दत्वेन पाकादिरूपकार कान्वयानापत्तिः, आख्याते एकत्वान्वयार्थ कर्तृकर्मणोरिव कृदन्तस्थले कारकान्वयार्थं कृते र्लक्षणांगीकारात । नचैवमपि लाघवात् कृता वेव शक्ति रस्तु, लाघवस्याप्यंगनिष्ठस्य दीक्षणीया मुख्यत्वस्येवांग गुणविरोधन्यायेन अकिंचित्करत्वात्, प्रधानस्य पुरस्स्फूर्तिकत्वेन तत्र शक्ता ववधारिताया मनवच्छिन्नाया श्शक्ते रयोगा दवच्छेद-कापेक्षायां तद्गत गौरवादे रुत्तरकाल प्रतीतिकत्वेन फलमुखत्वाच्च ।

अतएवानेकार्थं प्रतिपादकेपि घटादिपदे यत्रान्यतरार्थे प्राधान्य निया- मकाभाव स्तत्रैव लाघवस्या कृत्यधिकरण व्युत्पादितस्य नियामकत्वम् । नहि घट घटत्वयोः प्राधान्यनियामकं किञ्चिदस्ति, पूर्वोक्तविधयो भयोरपि साधभूतत्वेन स्मृतेर नियामकत्वा दुभयोरपि क्रमिकत्वेन बोधद्वयांगीकारेण वैशिष्ट्यानवगाहनात् प्रतीतेरप्य नियामकत्वाच्च । कृत्सु तु पूर्वोक्तविधया प्राधान्यस्यैव नियामकत्वाद्युक्ता कर्त्रादौ शक्तिः, नतु कृतौ । भावकृत्सु तु पाकइत्यादौ पाकपदमात्रेण कृतिप्रतीतौ पाकः क्रियत इति पृथक्कृति वाचकपद समभि व्याहारानुपपत्ते र्धात्वर्थ मात्र प्रतीतावपि कारकान्वयार्थं काष्ठैरोदनस्य पाकइत्यादावपि जायते क्रियत इति वा क्रियापदाध्याहारेण वाक्यपूरणं द्रष्टव्यम् । युक्तश्चैतत्, धात्वर्थस्यापि स्वजनकीभूत व्यापाराक्षेपकत्व सम्बन्धात् । अतः कृदन्तस्थले कृतिप्राधान्याभावात् अथाख्यातत्व तिङन्तस्थलेपि भाव प्राप्राधान्याभावे अथाख्यातत्वापत्तिः ; नचेष्टापत्तिः, भावप्राधान्यबोधक स्मृतिविरोधापत्ते रुक्तत्वात् ।

किञ्चास्मन्मते निपातोपसर्गं प्रातिपदिकातिरिक्त शब्दगम्योप स्तूपात्तलिंगसंख्यातिरिक्तोर्थः तत्तत्कारकशाब्दबुद्धित्वावच्छिन्नम्प्रति लिंगानन्वयिभावनाविशेष्यतासम्बन्धेन पदजन्योपस्थितिः कारणमिति एकयैव व्युत्पत्त्या बहूनां संग्रहाल्लाघवं । अन्यथाहि तत्तत्कारकादीनां धात्वर्थे तस्यच कालादीनाञ्च भावनायां तस्याश्चसंख्यायाञ्च प्रथमान्त इत्यनेकव्युत्पत्तिकल्पनागौरवम् ।

अत्रच कार्यतावच्छेदके निपातोपसर्गाणां समभिव्याहृतापान्वयं विना स्वार्थाबोधकत्वा दाद्यं विशेषणम् ।

अतएव तेषु क्रियासमभिव्याहारेसति तयैवान्वयः, यथानिर्वेधेषु भयः, अन्यसमभिव्याहारे त्वन्येनापि । प्रातिपदिकार्थस्यापि घटपटावादे स्तुपर्यं प्रायेवान्वयात् द्वितीयम् ।

यत्तु दधीत्यादौ सुब्लोप स्तत्र प्रातिपदिकान्वयस्यैव दधिक
र्मत्वादे र्व्युत्पत्त्यन्तरेणैव भावनान्वयेऽपि नक्षतिः । अत्रचाग्नेयोष्टाकपाल
इत्यादौ तद्धितोपात्तस्य देवतात्वरूपस्य कारकस्य तद्धितोपात्तद्रव्या
न्वयंविनापि क्रियान्वयिनः प्रातिपदिकार्थत्वेऽपि व्युत्पत्त्यन्तरेण तदङ्गी
कारा न्नोक्तव्युत्पत्तिभङ्गः । अतएव कारकत्वातिरिक्तसम्बन्धेन यत्र
तद्धितसमासादिवृत्ति यथा उपगवः राजपुरुषइत्यादौ तत्र क्रियान्व
याभावेऽपि पुरुषादावन्वयोनानिष्टः ।

यत्तु कारकत्वसम्बन्धेन वृत्ति, यथा आग्नेयइत्यादौ तत्र प्राथमिक
क्रियान्वयं विना कारकत्वायोगात् वृत्तेश्च पाष्ठिकसम्बन्धेनापि निर्वाहोप
पत्तेः आग्नेयोष्टाकपालसम्बन्धोऽपि तु भावनासम्बन्धद्वारक एवासौ ।
विचारयिष्यते चैतत्पौर्णमास्यधिकरणे वाक्यभेदोपपादनार्थं । सुबुपात्तलिंग
सङ्ख्ययो स्तुवर्थकरणत्वायान्वयिन उक्तविधशब्दगम्यत्वा न्नियमुत्पर्थं
वृतीयम् । प्रथमान्तस्थलेच्च प्रातिपदिकार्थस्यापि प्रथमयोपस्थितस्यैवान्व
यांगीकारा न्नातिप्रसङ्गः ।

एवं षष्ठ्यादीनामपि कारकत्वातिरिक्तेनापि सम्बन्धेन निमि
त्तपद्भावनान्वयांगीकारा दतिप्रसङ्गो निराकर्तव्यः ।

अर्थपदं च पदजन्योपस्थितिविशेष्यपरं । तेन यागादेः करणत्वान्व
यिनो भावनानन्वयेऽपि न क्षतिः । कारणतावच्छेदकेऽपि कारकाणां भाव
नापदोपस्थापितभावनान्वयापत्ते स्तद्व्यावृत्त्यर्थं लिंगानन्वयीति विशेषणं ।
अत एवौदनं भुक्त्वा व्रजतीत्यादौ क्त्वाप्रत्ययोपात्तभावनाया ओदनादि
सम्बन्धेऽपि तस्या लिंगानन्वयित्वान्नोक्तव्युत्पत्तिविघातः । नचैवमेक
स्मिन् वाक्ये भावनाद्वयसत्त्वात् कस्यां केषां कारकाणामन्वय इत्यत्रापि
नियामकाभावः , योग्यताया आसत्ते स्तात्पर्यस्य च नियामक
त्वात् । एवं गच्छतीत्यादौ प्रत्ययार्थस्यापि शबादिविकरणार्थभूतायामेव
तस्यामन्वयः । तस्मादेकयैव व्युत्पत्त्या बहूनां सङ्ग्रहाल्लाघवम् ।
अस्तु वा प्रकारीभूत तत्तदर्थभेदेन व्युत्पत्तिभेदः । तथापि परिपूर्णं पद
पदान्तरेणान्वेतीति न्यायेन प्रथमावगतयागादिव्युत्पत्तिवेलायां भावना

विशेष्यत्वस्य उपस्थितत्वेन तत्रैव विशेषणज्ञानरूपसामग्रीसत्त्वात् स्वर्गादिपदार्थान्तराणामपि प्रकारतया अन्वयव्युत्पत्तिकल्पना, नत्वन्यत्र, अन्यगतमुख्यविशेष्यत्वस्या नुपस्थितत्वेन विशेषणज्ञानाभावात् । अत एवविधवाधया इति भावनायामिव साक्षात्परम्परया वा योग्यतानुसारेण सर्वेषा मन्वयः । परम्परासम्बन्धस्थलेतु पार्ष्ठिको धात्वर्थादिसम्बन्ध इति न कोपि दोषः । नच पार्ष्ठिकबोधस्यापि श्रुतशब्दजन्यत्वाद्व्युत्पत्त्य न्तरकल्पनातादवस्थ्यम् , पार्ष्ठिकबोधस्य योग्यतत्तत्समस्तपदकल्प नया अनुमितपदजन्यत्वेन व्युत्पत्त्यन्तरकल्पनानापत्ते । निरुक्तपदा ध्याहारे प्रतिश्रुतशब्दस्य कारणत्वन्तु तथापि सम्मतमेव । इतरथा अय घटोस्ति जल मानेय मित्यतो घटकरणकजलानयन मित्येवं विधार्थप्रतिपादकपदाध्याहारानापत्तेः । पदान्तरकल्पनाकृतन्तु गौरवं कार्यकारणभावकल्पनाभावात् फलमुखत्वा च न दोष मावहति । तत्राप्याकांक्षायोग्यता तात्पर्यादिवशात् तत्तत्पदार्थं एव पार्ष्ठिकान्वय स्तत्तत्पदार्थस्येति नाव्यवस्थापि । स्पष्ट श्चाय मर्थो भावार्थाधिकर णादौ तत्र तत्र ।

नचैवं राजपुरुषो स्तीत्यत्र क्रियान्वयोत्तरं पार्ष्ठिकस्तात्पर्यादि सत्त्वे राजपुरुषयो स्स्वस्वामिभावादिरूपो भेदसम्बन्धोपि बुद्ध्येतेति वाच्यम् , अनुभवानुरोधेन नामप्रयोज्य तदर्थप्रकारक तदर्थविशे ष्यकान्वयबोधस्या भेदविषयत्वमिति नियमांगीकारात् । राजपुरुषयोः पार्ष्ठिकान्वयबोधस्या प्यस्मन्मते नामजन्यत्वाभावेपि स्वजन्यशाब्दबोध अनुमेयशब्दजन्यत्वेन नामप्रयोज्यत्वमस्तीतिप्युक्तम् तस्या भेदविष यत्वम् । वर च नामार्थयो स्तदभेदान्वयव्युत्पत्तिकल्पनापेक्षया निरुक्त व्युत्पत्तिकल्पनं, प्रयोज्यत्वस्य जन्यत्वापेक्षया लघुत्वात् ।

राज्ञः पुरुषोस्तीत्यादौ तु षष्ठ्यर्थनामार्थयो रन्वयस्य पार्ष्ठिकत्वा न्नाभेदविषयत्वप्रसङ्गः । अत एव तत्राभेदस्य वाधितत्वादेव षष्ठ्य

धो नाभेदसम्बन्धेन पुरुषेणेति, अपितु भेदसंसर्गेणैव । अभेदभ्रम दशायां पर तादृशवाक्यात्पार्ष्ठिकाभेदबोधवारणार्थं सुप्रयोज्य तदर्थ प्रकारक नामार्थविशेष्यकबोधस्य भेदसंसर्गविषयत्वम् , स्तोक पचतीत्यादौ अभेदाद्यार्थं च सुप्रयोज्य तदर्थप्रकारक धात्वर्थविशेष्यकबोधस्या भेदविषयत्वम् , दधि पश्यतीत्यादौ भेदसंसर्गबोधार्थं च शुद्धप्रातिपदिकप्रयोज्य तदर्थप्रकारक धात्वर्थविशेष्यकबोधस्य भेदविषयत्व, मित्याद्यनुभवानुसारेण कल्प्यम् ।

नचैवंविधव्युत्पत्तिकल्पनावश्यभावे किमिति शाब्दबोधविषयत्व मेव परेषा मिव नाङ्गीक्रियत इति वाच्य संसर्गविशेषनियामक व्युत्पत्तीनां तुल्यत्वेपि तत्तद्विशेष्यतानिरूपितप्रकारतानियामकव्युत्पत्तीनां भेदाभावेन अस्मन्मतस्य लघुत्वात् ।

नच भवन्मतेपि पार्ष्ठिकान्वयप्रकारतानियमार्थं तत्कल्पनावश्यभावः, इतरथा सोमं प्रति यागस्यारुण्य प्रत्येकहायन्या वा प्रकारता परो रिति वाच्य, यस्य यद्बोधाव्यवहितपूर्वबोधे साक्षात्सम्बन्धेन विशेष्ये प्रकारता तस्य निराकाङ्क्षत्वादेव तदुत्तरबोधेन्य प्रत्य प्रकारत्वात् ।

अत एव यस्य यद्बोधाव्यवहितपूर्वबोधे परम्परासम्बन्धेन विशेष्ये प्रकारता तस्यैव परम्पराघटकतावगत्यै तदुत्तरबोधेन्य प्रत्य[पि]प्रकारत्व यागैकहायन्यादे हि स्वर्गापूर्वौ प्रति द्वितीयबोधे साक्षादेव प्रकारत्वा च तृतीयबोधे सोमारुण्ये प्रति प्रकारता । अपितु सोमारुण्ययोरेव परम्परया भावना रूप प्रति च प्रकारयो परम्पराघटकावगत्यै याग मेकहायन्यां वा प्रति प्रकारत्व, तयोश्च तद्बलादेव विशेष्यत्वम् । इतरथा सोमारुण्यादिगत परम्परासम्बन्धानिर्वाहात । अत एव यस्य प्रकारस्य विशेष्यान्वये यो वस्तुत परम्परासम्बन्धरूप सस्यैव तस्ये नावगतौ तद्घटकपदार्थेन पार्ष्ठिकेऽन्वय शाब्देनावगम्यते, नतु योग्यतावशेनेन । अत एव राजपुरुषोस्तीत्यत्र प्रातिपदिकार्थ

भूतस्य स्वर्ग स्यष्टचर्थं निरूप्यतालक्षणं प्रकारतया वितस्य नायो ग्यतानिश्चयाभावदशाया पुरुषेणाभेदान्वय पाठित्व, निरूपकता स्वर्गस्याभेदाघटितत्वात् । अत एवाख्यातकरणत्वस्य द्रव्यपरिच्छेद द्वारेव त्यप प्रति प्रकारत्वात तस्यैवैकद्व पर्णां प्रति पार्थिवान्वय,

लाघवबोध परमनुमानादिना, नतु तदर्थं तद्वाचकशब्दानुमानम् । यदित्व न प्रकारतानियामकव्युत्पत्तित स्वर्गनियामकव्युत्पत्तिना भेदेनवल्पनं, अपितु सुपयप्रकारक भेदसंसर्गक शाब्दत्वावच्छिन्नप्रति विशेष्यता सम्बन्धेन धातुपदजन्योपस्थिति कारणमित्येवमादिक्रमेण एकपदैस्या शक्येत, तथापि धात्वर्थस्यभावनाया काढस्य विधेश्च पृथक्कार्यकारण भावकल्पना दस्मन्मतस्य लाघवमिति । उत्पत्तेचपरैरपि फलमव्यु त्पत्तित श्रुतशाब्दबोधे कृते पश्चात्तन्निर्वाहार्थं मर्थान्तरविषयमनुमान यथा तिङर्थेषु सामान्यसाधन च विशेषणीभूत इष्ट प्रथमान्तपदोपस्थाप्य स्वर्गकामविशेषणीभूत स्वर्गाभेदस्य । नहि नैयायिकमते स्वर्गसाध नत्व छिद्य, अपितिविष्ट सामान्यसाधनत्वमेव, नवाकामशब्दविशेषण स्वर्गपदमिदाभेद प्रतिपादयितुमलम् । अतश्च इष्टसाधनीभूतयागा नुकूलकृतिमान् स्वर्गकामइति शाब्दबोधे कृते पश्चादय स्वर्गाभिलेष्ट साधन यागइतिरप्यनुमानमिति ममापि श्रुतशाब्दबोध व्युत्पत्तितो कृते पश्चादय यथानुभव पाठकोबाधो नुमितशाब्दा दनुमानाद्वा इति न कश्चिद्विरोध ।

तस्मिद्ध सवयारकाणां भावनायामन्वयात् तस्या मुख्यविशेष्य त्वमिति ।

नचैव द्वितीयान्तस्यापि भावनायामेवा न्वयात धातोरसंसर्गकत्वा पर्मवाप व्यपरधानापत्ति, यद्वात्यपस्य पाठकान्वय प्रसङ्ग आत्मा

ना तद्धातोरकर्मकत्वांगीकारात् । पार्ष्ठिकान्वयलभ्य धात्वर्थ कर्मत्वमादायैव चोदनादौ द्वितीयोत्पत्तिः, नतु भावनाकर्मत्वमादाय । अन्यथा स्वास्थ्यं शयतीत्यपि प्रयोगापत्तेः । पार्ष्ठिकान्वयलभ्य सकर्मकत्वादि व्यवहारवदेव स्तोकं पचतीत्यादौ क्रियाविशेषणानामपि भावनारूपक्रिया सम्बन्धोत्तरकाललभ्यो धात्वर्थेनाभेदान्वयो द्रष्टव्यः ।

तस्मात्सिद्धा धात्वर्थातिरेकिणी प्रत्ययवाच्या मुख्यविशेष्या प्रयत्नरूपा भावनेति ।

तथच पूर्वोक्तन्यायेन कर्माकांक्षत्वा द्विविधमभिव्याहाराच्च तस्यां स्वर्गकामाधिकरणन्यायेनेप्सित जन्य स्वर्गादिभाव्यत्वेनान्वेति, भावार्थाधिकरणन्यायेनच यागादिः करणत्वेन । नच तस्य यत्नरूपभावना जन्यत्वात्कथं तस्यामेव करणत्वमिति वाच्यं, भावनाफलजनकत्वेन पारिभाषिकस्यैव भावनाकरणत्वस्यांगीकारात् । तस्याश्च स्वजन्य करणेन फले जन्यमाने ऽनुग्राहकापेक्षायां प्रकरणाधिकरणन्यायेन प्रयाजादीतिकर्तव्यतात्वेनान्वीयते । अतएव निर्व्यापारस्य द्रव्यस्या ऽनुग्राहकत्वायोगात् व्यापारानाविष्ट द्रव्यमपि नेतिकर्तव्यतात्वेन ज्ञायते, व्यापारसम्बन्धोत्तरन्तु तस्येतिकर्तव्यतात्वेन बोध इत्यपि तत्र तत्र वक्ष्यं भविष्यति ।

पार्थसारथिमतेतु व्यापारसामान्यस्यैव भावनात्वात् प्रयाजादीनांच तद्विशेषाणां व्यापारविशेषाकांक्षारूपेतिकर्तव्यताकांक्षया तत्वेनान्वयो नत्वनुग्राहकत्वेन । अतएव व्यापारानाविष्टस्य द्रव्यस्य तद्विशेषत्वायोगान्न तत्वेन ग्रहणमिति विशेषोपि प्रकरणाधिकरणे निरूपयिष्यते । नचैव भावनायां साध्यसाधनेति कर्तव्यतान्वयेपि समानप्रत्ययोपात्ता नभुत्या शुद्धायामेव तस्यां विध्यन्वयात्तदुत्तरकालीनस्य तदंशत्रयस्य विधिसंस्पर्शाभावेन ग्रहैकत्ववदविधेयतापत्तिः; अंशत्रयान्वयोत्तर तद्विशिष्टायां भावनायां विधिसम्बन्धाभ्युपगमेन पदपर्यवसानोपपत्तेः, पश्चा

न्निर्धारणात्पो विध्यन्वयाभ्युपगमेतु परिपूर्णं पदं पदान्तरेणान्वेतीति न्यायभंगापत्तिरितिवाच्यम् । शुद्धस्य यजस्य विधिविषयत्वानुपपत्ते । सामान्यतो यत्किंचिदाक्षिप्ताशत्रयोपेतभावनाया विधिसम्बन्धाभ्युपगमेनच पर्यवसानोपपत्ते. । पश्चान्निर्धारणापेक्षायां तत्तत्पदैर्विशेषनिर्धारणोपपत्ते ।

तस्मात्सिद्धांशत्रयान्विता प्रत्ययवाच्यभावना । अतश्च तस्य धात्वर्थस्यैव करणत्वं शीघ्र मवितमिति पाष्टिकफलसम्बन्धवेळायां तस्यैवान्वयो नतु द्रव्यादेरितिसिद्धं । अतश्च फलसम्बन्धनिर्वाहार्थं कल्प्यमान मपूर्वमपि सतत्त्वैत्यपिसिद्धम् ।

द्रव्यत्यागाद्धुतवहमुख क्षेपणाच्चातिश (का) स्ता
निष्प्रत्यूह विधिपरिचिता भावनेय चकास्ति ।
यस्या स्संगादतिशयफलमपि यागादिजाता
तामद्याहं मुररिपुपदद्वन्द्वपद्मेऽर्पयामि ॥

॥ इति भावार्थाधिकरणम् ॥ १ ॥

(अपूर्वस्य स्यातप्रतिपाद्यत्वाधिकरणम् ।)

॥ अथ अपूर्वाधिकरणम् ॥

॥ १ ॥ सू – चोदनापुनरारम्भ ॥ २ - १ - ६ ॥

एवं तावदपूर्वं सिद्धं गृहीत्वा तज्जनकं विचारितं । तत्सद्भाव एव त्वधुनाविचार्यते - किमस्त्यपूर्वं उतनेति । अत्रचापूर्वसद्भावस्याप्यपूर्वभेदोपयोगित्वा त्पादाध्यायसगती पूर्ववदेवा । आक्षेपिकीत्वनन्तरा।

तत्र प्रमाणाभावान्नापूर्वमस्ति । तथाहि, नतावदत्र प्रत्यक्षादिकं प्रवर्तते, याग स्वर्गसाध्यसाधनभावस्या पूर्वेपि तस्याप्रवृत्तेः । नापिशब्द', तदनुपलम्भात् । नच श्रुतयागस्वर्गसाध्यसाधनभावान्यथानुपपत्तिरेव तत्कल्पिका, नह्यन्यथाक्षणिकयागस्य कालान्तरभावि स्वर्गसाधनत्वमुपपद्यते, अत प्रमाणान्तराभावेपि श्रुतार्थापत्तिरेवापूर्वसद्भावे प्रमाण

मितिवाच्यम् , साध्यसाधनभावस्यान्यथानुपपत्तावपि अपूर्वस्य तदुपपादकत्वाभावात् कल्पनानुपपत्तेः । नह्यपूर्वेकल्पिते तेनैव स्वर्गजननादपूर्वोत्पत्तिं प्रति अन्यथासिद्धस्य यागस्य स्वर्गजनकता सम्भवति । नच अपूर्वस्य शक्तिरूपत्वा दवान्तरव्यापारत्वाद्वा ज्वालादिभिरिवनतेन यागस्यान्यथासिद्धिः, शक्तिव्यापारयो श्शक्तिमद्व्यापारवन्निष्ठत्वनियमेन शक्तिमति व्यापारवतिच यागे नष्टे शक्तिव्यापारयोरवस्थानानुपपत्तेः ।

नच अपूर्वस्य फलबलकल्प्यस्य यागनिष्ठत्वासम्भवेपि यागाश्रयभूतात्मनिष्ठत्वकल्पनेनापि शक्तिव्यापारत्वोपपत्तिरितिवाच्यम् , गुरुभूतापूर्वकल्पना विनापि यागस्वर्गसाध्यसाधनभावस्योपपन्नतरत्वेनैतादृशकल्पनाया प्रमाणाभावात् ।

तथाहि - यद्यपि तावत् क्षणिको याग स्साक्षादेव कालान्तरभावि स्वर्गजननाय नाल । तथापि स्वजन्य ध्वंसद्वारा समर्थएव । तस्यहि यागजन्यत्व सद्भावयोः क्लृप्तत्वात् केवल फलजनकत्वमात्र कल्प्यमित्यवान्तरव्यापारत्व सुलभम् । अपूर्वस्यतु सद्भावस्थायित्व यागजन्यत्व स्वर्गजनकत्व चेत्यनेकपदार्थकल्पनान्न तत्सुलभम् । यागस्यविनाशित्व प्रतिसन्धानोत्तरकालमेव ध्वंसद्वारकल्पनेन विनाशस्य उपस्थितत्वाच्च ।

नन्वेव ध्वंसस्यैव व्यापारत्वे तस्य नित्यत्वेन कीर्तनप्रायश्चित्तादिना नाशानुपपत्ते " धर्मः क्षरति कीर्तनात् " ' प्रायश्चित्तैन नश्यन्ति पापानि सुमहान्त्यपि ' इत्यादिशास्त्रविरोध , नह्यनयोः ज्योतिष्टोमब्रह्महत्यानाशकत्वसम्भव., तयोराशुतरविनाशित्वेन नाशकारणानपेक्षत्वात् । नापि तज्जन्यसुखदु.खनाशकत्व, तयोरुत्पन्नत्वेन नाश्यत्वोपपत्तेः । अत कीर्तनप्रायश्चित्तादिनाश्य यागादिजन्यमपूर्वमावश्यकमितिचेत् ? क्लृप्तध्वंसस्यैव व्यापारत्वे ऽथवारिते कीर्तनादीनां फलोत्पत्तिप्रतिबन्धकत्वस्यैव स्वजन्यध्वंसद्वारा साक्षादेवा कल्पनात् ।

अतएव यागध्वंसस्य नित्यत्वेन स्वर्गोत्पत्त्यनन्तरमपि स्वर्गान्तरोत्पत्ति प्रसंग इत्यपरास्तम् , स्वर्गध्वंसस्यापि तत्प्रतिबन्धकत्व कल्पनात् । नच कीर्तनादिध्वंसस्य प्रतिबन्धकत्वकल्पने प्रयोगान्तर जन्यस्यापि फलस्य प्रतिबन्धापत्तिः, तद्यागव्यक्तिकीर्तनजन्यध्वंसस्य तद्यागव्यक्तिजन्यफलप्रतिबन्धकत्वकल्पनात । नचैवं गौरवापत्तिः, तस्य फलमुखत्वात ; अपूर्वपक्षेपि समानत्वाच्च ।

अथवा न कीर्तन ध्वंसस्य प्रतिबन्धकत्वं कल्प्यते, गौरवात, अपितु कीर्तनात्यन्ताभाव विशिष्टज्योतिष्टोमव्यक्तित्वेन कारणत्वकल्पना अ कीर्तनस्थले यागध्वंसमात्रा त्फलसिद्धिः । अत्र च तद्व्यक्तित्वान्त मवश्यं विवक्षणीयम् , अन्यथा एकव्यक्तिकीर्तने व्यक्त्यन्तरेऽप्योपि फलानिष्पत्ति प्रसंगात् । नच कीर्तनवाक्ये कीर्तनमात्रश्रवणात् ज्योतिष्टोमवाक्येच तन्मात्रश्रवणा दुक्तविधकारणतावच्छेदकबोधकाभावः, तस्य वाक्यैक वाक्यतो त्तर मनुमानविधया बोधोपपत्तेः । नहि ज्योतिष्टोमादिवाक्येपि ज्योतिष्टोमत्वादि रूपस्य कारणतावच्छेदकस्य वाक्येनबोधः, कार्यतावच्छेदकबोधविना कारणतावच्छेदक बोधानुपपत्तेः । नह्यत्र स्वर्गत्वं कार्यतावच्छेदकं, अपितु विजातीयस्वर्गत्वम् । नच वैजात्यस्यवाचकंपदमत्रास्ति । स्वर्गपदेनैवतल्लक्षणायां प्रमाणाभावात् । अतो वाक्येन सामानाधिकरण्येनैव जन्यजनकभावेबोधिते पश्चादेवानुमानविधया विजातीयस्वर्गत्वस्य कार्यतावच्छेदकत्वेकल्पिते पश्चादेव ज्योतिष्टोमत्वादेर्यथोक्तविधस्यापि कारणतावच्छेदकस्य कल्पयितुं शक्यत्वात । अतो युक्तं ध्वंसस्यैव व्यापारत्वं नत्व कल्पनस्यापूर्वस्य । एतेन "तृप्तएवैन मिन्द्रः प्रजया पशुभिस्तर्पयती" त्यर्थवादोपात्तस्य देवताप्रसादस्यैव रात्रिसत्रन्यायेन द्वारत्वोपपत्ते र्नानुपस्थितापूर्वकल्पनं युक्तमिति वेदान्ति मतमपि प्रत्युक्तम , यतोऽनुपस्थितस्य ध्वंसद्वारकत्वेनैव नैराकांक्ष्ये रात्रि सत्रन्यायानवतारात । देवताप्रसादस्यापीच्छाविशेषरूपस्य क्षणिकत्वेन

व्यापारान्तरापेक्षणाच्च । तस्य ध्वंसद्वारकत्वांगीकारे च तस्यान्तर्ग डुकत्वापत्तेः वरं यागध्वंसस्यैव व्यापारत्वंकल्पनम् ।

नच ध्वंसस्य फलकारणत्वे यागस्य कारणीभूताभाव प्रतियोगित्वेन प्रतिबन्धकत्वापत्तिः ? यस्मिन्नभावे संसर्गाभावत्वेन कारणता तादृशाभाव प्रतियोगित्वस्यैव प्रतिबन्धकत्वांगीकारात् । प्रकृते तु ध्वंसत्वेन कारणता, नतु संसर्गाभावत्वेनेत्यदोषः ।

नच ध्वंसस्याभाव रूपत्वात् कथं फलजनकत्वं, अभावस्य क्वापि कारणत्वादर्शनादिति वाच्यम्; अभावस्यापि कारणत्वांगीकारे बाध काभावात् । अतएवानुपलब्धे रभावरूपाया एव घटाद्यभाव ग्राहक त्वमंगीकृतम् । एवं सन्ध्यावन्दनाद्यभावस्य च प्रत्यवायजनकत्वम् ।

यत्तु वार्तिके " नैवाभावस्य क्वचिदपि कारणत्वं दृष्टं, यदितु सन्ध्यावन्दनादौ कश्चिदुद्भाव्येत ततो निमेषादिरूपस्य तत् कालक्रियमाणस्य भावस्यैव कारणत्वकल्पना दप्रयोजक" मित्युक्तम्, यच्च न्यायसुधाकृता " अभावस्य कारणत्वेपि भावसहकृतस्यैव तस्य कारणता - नशुद्धस्य- क्वचिदपि तथा अदर्शनात्, सन्ध्यावन्दनाकरण स्यापि च विध्यज्ञानरूपभावान्तरसहकृतस्यैव प्रत्यवायजनकत्वादि " त्युक्तं, तदतिशयार्थ, शुद्धस्याभावस्यापि कारणत्वांगीकारे बाधकाभा वात् । अतो भावस्यापि कारणत्वांगीकाराद्युक्तं ध्वंसस्यापि द्वारत्वम् ।

यत्तु- वार्तिके यागध्वंसविशिष्टादात्मनएव फलोत्पत्त्युपपत्तेर्ना पूर्वक ल्पनायुक्तेति पक्षान्तरमुपन्यस्तं, तदात्मनोनित्यत्वेन अवान्तरव्यापारत्वा योगा द्विशिष्टस्य व्यापारत्वांगीकारेपि वा लाघवेन ध्वंसस्यैव व्यापारतोप पत्ते रात्मनोपि व्यापारान्तः प्रवेशे गौरवादुपेक्षितं । तदेवंधानात्यपूर्वमिति प्राप्ते-

अभिधीयते, फलन्तावत प्रधानयागान्तरभावीति निर्विवादम्, नहि " यन्न दुःखेन " इत्यादि वाक्यदोषावगत निरतिशयसु

एतद्रूपयोः स्वर्गनरकयो रस्मिन् जन्मन्युपभोग- सम्भवति; विहितस्यापि वृष्टिपश्वादेः स्वांगप्रधानजन्यस्य न प्रधानमात्रोत्तर मुत्पत्तिसम्भवः, अतः कालान्तरभाविफलोत्पत्तिर्न क्षणिकात् कर्मणो व्यापार मन्तरेण सम्भवतीति व्यापारापेक्षायां न तावत् ध्वंसस्य व्यापारत्वं सम्भवति, स एवहि व्यापारः कल्पनीयो य श्रुताविरोधी तदिह यथैव निरतिशयसुखरूपे स्वर्गाख्यफले श्रुते तस्येह जन्मन्यसम्भवेपि जन्मान्तरीयत्वमेव कल्प्यते नतु पुत्राद्यपेक्षया पेक्षिकं निरतिशयत्व मादाय सार्वभौमत्वादिकं गृह्यते- स्वर्गशब्दस्यौपचारिकत्वांगीकरणे कारणाभावात् , जन्मान्तरीयत्वकल्पनस्य च फलमुखत्वेनादोषत्वात् , तद्वदिहापि धर्मः क्षरति कीर्तनात् प्रायश्चित्तेन नश्यन्ति पापानि सुमहान्त्यपि इति कीर्तनप्रायश्चित्तादीनां नाशकत्वश्रवणान्नाशादृ किञ्चिदवश्यं कल्पनीयम् ।

नच याग स्वध्वंस स्वरफलं वा सम्भवति, नच नाशशब्दस्य फलोत्पत्तिप्रतिबन्धे कारणीभूतावच्छेदक धर्माभूतात्यन्ताभावे वा लक्षणेति वाच्यम् , लक्षणायां प्रमाणाभावात । अत एव बलमर्थ्वंसद्वारकत्वकल्पनापेक्षया ऽपूर्वकल्पनस्य गुरुभूतत्वेपि तस्य फलमुखत्वा दवश्यं प्रायश्चित्तादिनाश्य मपूर्व मेव कल्प्य। तेन यथैव निषादस्थपतिपदे लक्षणापादकसमासानंगीकरणेन श्रौतकर्मधारयमेव अंगीकृत्य पश्चा दापद्यमानं विद्या तदुपाक्षेपकत्वं फलमुखतया दंगीकृतं, तथैव नाशपदस्य श्रौतार्थलिप्सयाऽपूर्व मंगीकर्तव्यमेव ।

किञ्च कीर्तनादेः फलप्रतिबन्धकत्वांगीकारे तावत् प्रतिबध्यतावच्छेदकस्य तद्व्यक्तित्वस्या प्रसिद्धत्वादेवानुपपत्तेः. विजातीय स्वर्गत्वादिना प्रतिबध्यतांगीकारे च प्रयोगान्तरेपि फलानापत्ति प्रसंगः । कीर्तनात्यन्ताभावविशिष्ट ज्योतिष्टोमव्यक्तित्वेन कारणतांगीकारे गौरवं, अनेककार्यकारणभावकल्पनापत्ति श्च । अस्मन्मते

सत्यपि तत्कीर्तनत्वेन तद्व्यक्तिजन्या पूर्वनाशत्वेन कार्यकारण भावानेकत्वे कारणतावच्छेदके गौरवाभावात् धर्मः क्षरति कीर्तना दिति शास्त्रोक्तत्वेन प्रामाणिकत्वाच्च न दोषः ।

किंच ध्वंसस्य प्रधानव्यापारत्वे तुल्यन्यायत्वा दंगेष्वपि स एव व्यापारोंगीकर्तव्यः, ततश्च तस्य निरयत्वा द्विकृतिप्रयोगवेळायामपि सत्वा द्विकृतीनां पशुपुरोडाशवत्प्रासंगिकत्वोपपत्तेः प्रयोग[गा]भेदेपि तज्जन्यस्यो पकारस्य लब्धत्वा न्न पृथगंगानि कर्तव्यानि स्युः । तथाच विकृतौ प्रयाजे कृष्णल जुहोतीति दर्शनानुपपत्तिः । अस्मन्मते त्वंगा पूर्वाणा प्रधाना पूर्वोत्पत्त्यनन्तरं नाशा द्विकृत्य पूर्वसिद्ध्यर्थं पुन रंगकरणोपपत्तिः । अपि च अस्मिन् पक्षे अंगाना मुप- योगः ? न तावत्प्रधाने, तस्य प्रयाजाद्यजन्यत्वात् । नापि त- द्ध्वंसे, तस्य तानि विनापि जायमानत्वात् । नापि फले, प्रधानत्वापत्तेः । अतोवश्य मंगप्रधानव्यवस्थासिद्ध्यर्थ मप्यपूर्वं कल्पनीयम् । तथाहि-प्रधा नेनापूर्वे जननीये अंगानामपि सहकारित्वकल्पनात प्रधानएववा योग्यता विशेषजनना द्स्ति तेषामुपयोगः । तस्माद्वश्यं यागस्य ध्वंसातिरिक्तो व्यापारो वाच्यः । नच यागस्यैव तर्हि फल यावत्स्थायित्व लाघवा दस्तु, किं व्यापारकल्पनयेति वाच्यम् , तृतीयादिक्षणे प्रत्यक्षतापत्तेः । तद्यागव्यक्तिप्रत्यक्षे तद्यागव्यक्ति द्वितीयक्षणस्य कारणत्वकल्पने चा नन्तकार्यकारणभाव कल्पनापत्तेः । नचैतस्य फलमुखत्व, विषय प्रत्यक्षयोः कार्यकारणभावस्य लोकसिद्धत्वेन स्वर्गसाधनत्व ज्ञानान पेक्षत्वात् । कीर्तनापूर्वव्यक्तयो नोश्यनाशकभावानेकत्व कल्पनात्तु धर्मः क्षरतीति शाब्दबोधोत्तरकालीनत्वा त्फलमुखेति विशेषः । अतोवश्य व्या पारोवाच्य । सोपिच न देवताप्रसादरूपः, तस्य देवतानिष्ठत्वेन फल व्यधिकरणस्य फलजनकत्वानुपपत्तेः । देवताया श्चैतन्य विग्रहः प्रसादस्तस्य च स्यापित्यमित्यनेकार्थ कल्पनापत्तेश्च । विशिष्यचा य नवमे निराकरिष्यते । अतः परिशेषादपूर्वमेव कल्प्यम् । तच्च

यागेनापूर्वं कृत्वा स्वर्गं कुर्यादिति श्रुतार्थापत्तिकल्पित वैदिकशास्त्रग- म्यत्वादेव नाप्रामाणिकं। नचैवं श्रुत यागस्वर्ग साध्यसाधनभावव्याघातः, अपूर्वस्य शक्तिरूपत्वेन व्यापाररूपत्वेन वा कल्प्यमानत्वा च्छक्तिव्यापाराभ्यां च ज्वालादिवच्छक्तिमतो व्यापारवतोवा साधनत्वा विघातात्।

नचैव शक्तिमति व्यापारवतिवा यागेनष्टे तन्निष्ठापूर्वस्यापि नाशापत्तिः, अपूर्वस्य यागीयत्वेपि फलवत्कल्प्यत्वेन यागनिष्ठत्वाकल्पनात्, यथैव ह्यनुभवव्यापारस्यापि संस्कारस्य नानुभवनिष्ठत्व किन्तु फलबलेन स्मृति समानाधिकरणत्वसिद्ध्यर्थं आत्मनिष्ठत्वमेव, तथात्रापि अपूर्वस्यापि फलसामानाधिकरण्यसिद्ध्यर्थं फलबलेन फलभोक्तृनिष्ठत्वमेव कल्प्यतइति न विरोधः। अतएव गयाश्राद्धादौ यत्रपितुः पुत्रस्य च फलभोक्तृत्वं शास्त्रान्तरप्रमितं तत्रोभयनिष्ठा पूर्वद्वयकल्पनं। अपूर्वद्वयमपि च तत्र कीर्तननाश्यमेव। एवं दम्पत्योरुभयोरपि भोक्तृत्वादुभयनिष्ठमपूर्वद्वय, तत्रापि तत्त न्निष्ठकीर्तनस्यैव तत्त न्निष्ठापूर्वनाशकत्वम्।

यत्रे तरस्यैव रोगादिनिवृत्त्यर्थं दर्शपूर्णमासाद्यनुष्ठानं तत्र तात्पर्यातरस्य व्यासज्यवृत्तिकर्तृत्वे फलभोक्तृत्वाभावान्न तन्निष्ठापूर्वान्तरकल्पन, अपितु भोक्तृनिष्ठमेव। अत एव यत्रेतरस्य सत्यपि कर्तृत्वे फलभोक्तृत्वाभावान्न फलिसंस्कारावपनादयः। एव जातेष्ट्यादौ पुत्रस्यैव फलभोक्तृत्व,नतु पितुस्तत्रापूर्वं फलिसंस्कारोवा। याज्ञिकास्तु पितर्यपि फलिसंस्कारानुतिष्ठन्त्येव। नचैवं पुत्रस्य भोक्तृत्वसत्त्वा त्तत्र फलसंस्कारा अप्यपूर्ववदभ्युपगम्येरन्निति वाच्यम्, वपनादीनां कर्तृनिष्ठ फलाधानयोग्यताजननार्थत्वात्पुत्रस्य कर्तृत्वाभावेन वपनाद्यप्राप्त्यभावात्। वपतइत्यादिषुहि आत्मनेपदानुरोधेन पुरुषप्राधान्यावगतेः वपनादेरवघातादिवत्संस्कारत्वावगमादुपनेन प्रधानफलाधारत्वयोग्यतासम्पादनद्वारा पुरुषं संस्कुर्यादित्यर्थोपगतेः संस्कारस्यच भूतभाव्युपयोगापेक्षायां कर्तृत्वद्वारेण यागापूर्वसंबन्धावगते स्वपूर्वजनकयागकर्तारं यागजन्यफलाधारत्व योग्यतासम्पा

द्वनद्वारा वपनेन संस्कुर्यादित्यर्थः प्रतीयते । अतश्च पुत्रस्य कर्तृत्वा भावा दप्राकृतकार्यकारिणि तस्मिन् न वपनादिधर्मप्राप्तिः । नच सं स्कार्यस्यापूर्वजन्यफलाश्रयत्वसंम्बन्धेनैवा पूर्वसम्बन्धोपपत्ते नावश्यं कर्तृ त्वेनैव सविवक्षणीयइतिवाच्यम् , वपतइत्यात्मनेपदेन वपनकर्तरि वप नजन्यफलोत्पत्त्यभिधाना द्वपनस्य चांगत्वेन प्रधानविधिविधेयस्य प्रधा नफलेनैव कर्तृनिरूपणा द्वपनवाक्ये कर्तृतासम्बन्धस्यैव शीघ्रोपस्थितिक त्वात् । विस्तरेणचायमर्थ स्तृतीये निरूपयिष्यते । तस्माज्जातेष्टिस्थ ले फलसंस्काराभावेपि पुत्रनिष्ठमेवापूर्व नपितृनिष्ठं । तस्मिंस्तु निमित्त बला दकरणएव दुःखजनकीभूतं प्रत्यवायरूप मपूर्वमिति विशेषः । तात्सिद्धं नष्टेपि प्रधाने फलबलेनात्मनिष्ठापूर्वकल्पनम् ।

एवमंगानामपि प्रधानगतफलजननयोग्यतासम्पादनफलकानामने केषां युगपद्योग्यतासंपादकत्वानुपपत्ते रवांतरव्यापाररूपापूर्वकल्पना न्नष्टे ष्वप्यंगेष्वात्मगतापूर्वसिद्धिः । तत्रच परंपरासंबन्धेन प्रधानगतयोग्यताया अपि सत्वात्फलसामानाधिकरण्यलाभः । तत्र त्वयं विशेषः-आराद्दुपका रकाणान्तावत्समिदादीनां प्रकरणाद्यवगतयागांगभावानामपि प्रधानयाग स्वरूपस्य तदजन्यत्वा त्तत्रोपयोगकल्पनानुपपत्तेः तज्जन्योत्पत्त्यपूर्वाणां च प्रधानाव्यवहितोत्पत्तिकानां प्रधानापूर्वोत्तरकालवर्तिभि रारादुप कारकै रुत्पत्त्यसम्भवा त्तत्राप्यनुपयोगेपि तेष्वेव तज्जन्यापूर्वजननानुकूला योग्यता जन्यते ।

नच उत्तरांगानामेव परमापूर्वजननानुकूल योग्यता संपादकत्वमस्तु, पूर्वांगानांतूत्पत्त्यनुकूल योग्यताजनकत्वमेवास्त्वितिवाच्यम् ; लाघवादारा दुपकारित्वावच्छेदेनैव परमापूर्वोपयोगित्वस्य कल्पनात् । नच-उत्पत्त्यपूर्वे ष्वनुपयोगेपि प्रधानापूर्वैःपरमापूर्वे जननीयेंगानामपि स्वस्वावांतरापूर्वद्वारा सहकारिकारणत्व मस्त्वितिवाच्यम् ; तथासति फलइव परमापूर्वेपि जनक त्वाविशेषेण प्रधानतुल्यतापत्तेः । अतो योग्यतासम्पादनमेवतैरुत्पत्त्यपूर्वेषु क्रियते । योग्यैश्चतैःपरमापूर्वजननमितिद्रष्टव्यम् । अतएव प्रधानापूर्वानेकार्थे

क्रमेण सर्वेषु तेषु तैरेवापूर्वैः योग्यतासम्पादनमिति द्रष्टव्यम् । अतश्चान्तिमप्रधानापूर्वनिष्ठयोग्यताजननानन्तरमेव तेषां नाशः । योग्यतापि च सुत्यापूर्वाव्यवहितापूर्वजननानुकूला । तच्च क्वचित् वक्ष्यमाणरीत्या समुदायापूर्वं क्वचिच्च परमापूर्वमिति विशेषः । अत एव प्रकृतौ समुदायापूर्वस्यैवाव्यवहितस्य सौर्यादावभावेपि परमापूर्वस्यैवाव्यवहितत्वात्तदनुकूलैव योग्यता । सुत्याकालीनांगानाञ्च प्रकृतावव्यवहितपरमापूर्वानुकूलयोग्यताजनकानां द्वादशाहे अव्यवहिततत्सुत्यासमुदायापूर्वानुकूलयोग्यताजनकत्वम् । युक्तञ्चैतत् - करणस्यानुग्रहापेक्षारूपेतिकर्तव्यताकांक्षायां प्रकरणादिनावगताङ्गभावानां प्रयाजादीनां साक्षात्प्रधान तदपूर्वार्थत्वयोरसंभवे तदव्यवहितापूर्वार्थत्वस्यैव कल्पनात् । अतश्चोत्पत्त्यपूर्वाव्यवहितापूर्वजननानुकूलयोग्यतासम्पादनमुत्पत्त्यपूर्वनिष्ठमारादुपकारकाणां स्वावान्तरापूर्वद्वारा फलमिति सिद्धम् ।

यत्तु "वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत" इत्यादौ बृहस्पतिसवादीनां वाजपेयेनेति तृतीयाबलेन बृहस्पतिसवव्यतिरिक्तसर्वांगयुक्तवाजपेयानुष्ठानेन तज्जन्यपरमापूर्वं निष्पन्नानन्तरं क्रियमाणानां न परमापूर्वनिष्पत्त्यर्थमुपयोगसम्भवः, तत्र परमापूर्वस्यैव बृहस्पतिसवाकरणे नाशकल्पना त्परमापूर्वस्थापकत्वं वैमृधस्य च पौर्णमासी समुदायापूर्वस्थापकत्वमिति मूलानुयायिनः ।

वस्तुतस्तु बृहस्पतिसवापूर्वं वाजपेयपरमापूर्वावस्थानं यावत् स्थापि न वा? आद्ये प्रसंगसिद्ध्यापत्तेः वाजपेयप्रयोगान्तरे पुनर्बृहस्पतिसवकरणानापत्तिः । नान्त्यः, बृहस्पतिसवापूर्वनाशे वाजपेयापूर्वस्यावस्थानानुपपत्तेः । न च - बृहस्पतिसवापूर्वानुत्पत्तेरेव तन्नाशकत्वकल्पनाददोष इति वाच्यम्, प्रयाजाद्यपूर्वानुत्पत्तेरपि दर्शाद्यपूर्वोत्पत्तिप्रतिबन्धकत्वकल्पनापत्त्या तस्यापि स्थायित्वानापत्तेः पशुपुरोडाशेपि प्रसंगसिद्ध्यनापत्तेः ।

अथ - अपूर्वानुत्पत्तेरश्रुताया गुरुभूतायाश्च कारणत्वाकल्पनात्प्रयाजाद्यपूर्वाणां प्रधानापूर्वनिष्पत्तिपर्यन्तं स्थायित्वं कल्प्यते ? ततो

बृहस्पतिसवाकरणस्यापि नाशाकारणत्वाकल्पना त्स्थापकत्वासिद्धिः । अतो वाजपेयपरमापूर्वस्य वाजपेयफलानुकूल योग्यतासम्पादनं बृहस्पति सवापूर्वेण क्रियतइति वेदितव्यम् । एवं परिधानीये कर्मण्यपि सादनादिपात्र प्रतिपत्त्यपूर्वस्यापि अव्यभिचरित क्रतुसम्बन्धोपस्थापिता मुष्मिकफलसाधन क्रतुजन्य परमापूर्वनिष्ठयोग्यतां फलानुकूलां प्रत्येव जनकत्वं बोध्यम् । नचा विशेषप्रवृत्त प्रतिपत्त्यनुरोधेन कार्यायादि जन्यपूर्वे स्त्यामुष्मिकत्वकल्पना; आहिताग्निजनक पवमानेष्टयनुरोधेन प्रतिपत्तेरैहिकातिरिक्त क्रतुविषयत्वस्यावश्यकत्वे नैवंविधकल्पनस्या न्याय्यत्वात् । अत एव पवमानेष्टयनन्तरएवकरणे नदक्षिणहस्तादिनियमः । याज्ञिकास्तु सादनस्य दाहांगत्वमभिप्रेत्य तमनु तिष्ठन्ति । दाहस्यतु संस्कारेषु पाठा दामुष्मिकंफलोपयोगिसंस्कारं प्रत्यपि जनकत्वा त्पवमानेष्टयनन्तरं करणेपि न विरोधः । आहिताग्नि शरीरप्रतिपत्तिस्तु आनुषंगीकीति तदभावेपि नक्षतिः । नचैव- दर्शाद्यपत्त्यपूर्वेष्वेव फलजननानुकूल योग्यताया उत्तरांगैस्सम्पादनोपपत्ते स्समुदायापूर्व; परमापूर्वयोः कल्पनानुपपत्तिः, तत्र वा तत्कल्पने वाजपेयेपि परमापूर्वजन्या पूर्वान्तरस्वीकारापत्तिरिति वाच्यम् ; अपूर्वान्तर स्वीकारेमानाभावात् । यथा च समुदायापूर्व परमापूर्वयोः कल्पनोपपत्ति स्तथोत्तरत्र निरूपयिष्यामः ।

; वस्तिद्धआरादुपकारकाणा मुपयोगः । सन्निपत्योपकारकाणान्तु श्रुत्याद्यवगतव्रीह्याद्यंगभावानां व्रीह्यादिस्वरूपे आनर्थक्य प्रसंगेन तण्डुलादिपरम्परया प्रधानपर्यन्तं गमनात्तत्राप्यानर्थक्यप्रसक्ते स्तत्पत्त्यपूर्वजननानुकूल वह्नत योग्यतासंपादनमेव फलमवसीयते । अत एव तत्त दुत्पत्त्यपूर्व जननानुकूल तत्तत्प्रधानानुगत तत्त योग्यता सम्पादनपर्यन्तं प्रोक्षणादिजन्या वान्तरापूर्वस्यावस्थानम् ।

नच-व्रीहिगत योग्यताजननमेव प्रोक्षणादेः फलमस्तु, किं प्रधानगत येतिवाच्यम् , व्रीहिगताहि योग्यता किं तण्डुलादि जनिकावास्याद्

अपूर्वजनिका वा ? नाद्यः, तण्डुलाद्युत्पत्तौ लौकिकसिद्धत्वेन प्रोक्षणाद्यजन्यत्वात्; अवघात अन्यत्वेऽपि तन्नियमाजन्यत्वस्य तुल्यत्वाच्च । नान्त्यः, व्रीहीणामपूर्वाजनकत्वात् ; परम्परासम्बन्धांगीकारेऽपि विवक्षितरीत्या प्रधानतदपूर्वजनकस्यैव अदृष्टोपाया पेक्षितत्वेन तत्रैव प्रोक्षणादीनां योग्यताजनकत्वस्य कल्पनीयत्वात् । अत उत्पत्त्यपूर्वजनकप्रधानगतयोग्यतासम्पादनफलकानां प्रोक्षणादीनां साक्षात्तत्फलजनकत्वायोगात् अवान्तरोपकारद्वारेण तदित्यभिप्रायः । स चावान्तरोपकारः क्वचिददृष्टरूपः, यथा प्रोक्षणादिषु । क्वचिद्दृष्टरूपः, यथा अवघातादिषु । यत्रापि दृष्टरूपस्तत्रापि नियमांशे ऽदृष्टरूपोऽस्त्येवेति वक्ष्यते । उभयविधोपकारश्चायं व्रीह्यादिगत क्रियाजन्यातिशयशालित्वरूप कर्मत्वनिर्वाहाय व्रीह्यादिगत एव कल्प्यते । ननु प्रयाजादि वदात्मनिष्ठः । अतएव वपनादिजन्यस्या दृष्टस्यात्मगतत्वेऽपि संस्कार्यत्वा दात्मनः कर्मत्वाविघातः । दृष्टरूपस्य तु वितुषीभावादेः व्रीह्यादिनिष्ठत्वं प्रत्यक्षसिद्धमेव । अवघातादिनियमादृष्टस्यापि यदर्था क्रिया तदर्थो नियम इति न्यायेन व्रीह्यर्थतावधारणाद्व्रीहिनिष्ठत्व मेव । नचैवं – व्रीह्यादिनाशे तन्नाशापत्तिः; व्रीहिनाशेऽपि तददृष्टस्य व्रीह्यवयव निष्ठत्वकल्पनात् । अतः पुरोडाशवृत्तिप्रोक्षणादिजन्य मपूर्वं विषयतासम्बन्धेन पुरोडाशयागवृत्ति उत्पत्त्यपूर्वानुकूलं योग्यतामादधातीति सिद्धं ।

ननु-उक्तन्यायेन अवघातनियमादृष्टस्यो पयोगसम्भवेऽपि दधिप्रोक्षादिनियमादृष्टानां न तत्सम्भवः; तद्धि यागे कृते नियमेनोत्पद्येत, अतश्च प्रथमक्षणे यागोत्पत्तिः, द्वितीयक्षणे अदृष्टं, तृतीयक्षणेच तेन योग्यता, तेन चतुर्थक्षणे यागस्य नष्टत्वात् नापूर्वोत्पादकत्व सम्भव इतिचेन्न;-नियमादृष्टं हि न नियमजन्यं, किन्त्ववघातजन्यमेव । वितुषीभावेनादृष्टयता व्यवच्छेदकेति परं वक्ष्यते । अत श्च तुल्यन्यायतया दध्यादिभि र्यागे जन्यमाने तस्मिन्नेव क्षणे तैरदृष्टमपि द्वितीयक्षणे तेन यागे योग्यता तृतीयक्षणेच योग्येन तेनोत्पत्त्यपूर्वं यागनाशश्चेति न किञ्चि दनुपपन्नम् ।

अत एव तदपूर्वस्य न दध्यादिनिष्ठता, तस्य यागसमानकाल एव प्रक्षिप्यमाणत्वेन तन्नाशे नाशापत्तेः। अपितु यागनिष्ठता आत्मनिष्ठता वा। येषांतु प्रधान समकालानां तदुत्तरभाविनां वा प्रक्षेपस्विष्टकृदादिभक्षाणां प्रतिपत्तित्वेन नोत्पत्त्यपूर्वोत्पत्त्युपयोगिप्रधानगत योग्यताजनकत्वसम्भव स्तेषामपि परमापूर्वजननानुकूलोत्पत्त्यपूर्वगतयोग्यताजनकत्वेन वा उत्पत्त्य पूर्वस्थापकत्वेन वोपयोगो द्रष्टव्यः। अत एव तन्नियमापूर्वं मप्यात्मगत मेव, नतु संस्कार्यत्वेपि द्रव्यगतं, तस्य प्रतिपत्तिनाश्यत्वेना पूर्वाधार त्वानुपपत्तेः। संस्कार्यत्वं च तत्र दृष्टरूपसंस्काराश्रयत्वादेवोपपन्न मिति न कश्चि द्विरोधः। तदेव मंगानां प्रकारभेदे सत्यपि सर्वेषां साक्षा त्परम्परया वा करणानुग्राहकत्वा दिति कर्तव्यतात्वोपपत्तिः।

तत्सिद्धं नष्टेपि व्यापारिणि फलबलेनाश्रयान्तरकल्पनोपपत्ते रपूर्वव्या पारेणैव यागादीनां फलजनकत्वमिति। तच्च एकमेव प्रधानं पूर्वो त्तरांगविशिष्टं फलसाधनं तत्र प्रधानानन्तरक्षणे एक मपूर्वं मपरंच सर्वांगसमाप्त्युत्तरं परमापूर्वम्। एवं यत्र प्रधाना न्यनेकानि तत्रापि यावन्त्युत्पत्त्यपूर्वाणि एकं परमापूर्व मित्युत्सर्गः। यत्रतु दर्शपूर्णमासादौ पौर्णमास्यां दर्शे च सांगत्रिकद्वयानुष्ठानम्, तत्रैकस्मिन् समुदाये उत्पत्त्यं पूर्वत्रयेण सर्वांगकरणात्ते रेकैकं समुदायापूर्वं जन्यते; तत श्च समुदायद्वयान्ते ताभ्या मेकं परमापूर्वमिति विशेषः। अत एवारादुपकारकांगाना मपि तत्तत्समुदायापूर्वे एवोपयोग कल्प ना त्समुदायद्वयेपि पुनः पुनरनुष्ठान मंगानां न विरुद्ध्यते। नच द्विरंगानुष्ठानस्य परमापूर्वं एवोपयोगसम्भवा त्समुदायापूर्वकल्पने मानाभावः, " पौर्णमास्यां पौर्णमास्यां यजेत " " अमावास्याया ममावास्यायां यजेत " इति वाक्यद्वयावगतकरणत्वसाहित्यस्यैव मान त्वात्। यद्यपि चोत्पत्तिवाक्ये प्रत्येकमेव करणत्वा दत्रापि न त्रिक निष्ठ व्यासज्यवृत्त्येकं सत; तथापि करणताश्रयसाहित्यस्योपादेयगतस्यैक कार्यनिरूपितत्व मावश्यकं, अन्यथा चित्रासोमादावपि साहित्यस्यद्वारा

नुपपत्ते, अत एव समुच्चित्यैककार्यकारित्व मेव साहित्यपदार्थ । इदं च न फलनिरूपितम्, करणषट्कसाहित्यस्यैव तदङ्गत्वात् । अत एव न परमापूर्वनिरूपितं । नाप्युत्पत्त्यपूर्वनिरूपितम्, तस्यैक करणजन्यत्वात् । अत स्तत्तद्वाक्ये करणत्रयसाहित्यस्यापि कार्यापेक्षा या समुदायापूर्वद्वयसिद्धि ।

अत एव सान्नाय्ये दधिपयसो स्सम्प्रतिपन्न देवता कत्वेन सद्वानुष्ठाना देकमेवापूर्व मस्तित्यपास्तम्, तत्र दुत्पत्तिवाक्ये निरपेक्षकरणत्वस्य निरूपकापेक्षाया मन्याचम्भवेनैवा पूर्वद्वयसिद्धे । एव मग्निहोत्रचातुर्मास्यादिष्वपि साय मातरादि वाक्येषु करणत्वेन प्रयागविधाना त्समुदाया पूर्वसिद्धि ।

अग्निहोत्रेतु सत्यपि कर्मैकत्वे देवतासमुच्चयाद्यनुरोधेना भ्यासा दुत्प त्त्यपूर्वभेदावगमा त्कालभेदेन समुदायापूर्वभेदात्तदुत्तर परमापूर्वोत्पत्ति रिति द्रष्टव्यम् । सोमेतु सत्यप्यभ्यासा दुत्पत्त्यपूर्वभेदे समुदायापूर्वाभावा त्तदुत्तरमेव परमापूर्वोत्पत्ति । द्वादशाहादौतु तत्तदह र्गतकरणत्व बलेन तत्सुत्या पूर्वाण्यपि तत्तद्दद्यज्यभ्यासोत्पत्त्यपूर्वजन्यानि कल्प्यन्त इति ते रेव परमापूर्वसिद्धि ।

ननु कल्प्यन्तां तत्र तत्रोत्पत्त्यपूर्वाणि करणत्वबलेन वा समुदाया पूर्वाणि, परमापूर्वंतु नैव किंचित्प्रमाण पश्याम । तथाहि यत्र तावदस्ति समुदायापूर्व तत्राराादुपकारकाणां तत्रैवोपयोगान्नातिरिक्ता पूर्वांतर कल्पनायां प्रमाणमस्ति । यत्रापि च न समुदायापूर्व तत्राप्युत्तराङ्गै रुत्पत्त्यपूर्वेष्वेव फलजननानुकूल योग्यतासम्पादनोपपत्ते र्नातिरिक्तापूर्व कल्पन । यत्र नैवारादुपकारकाणि उत्तराङ्गाणि सन्ति तत्र परमापूर्व कल्पनायां किं प्रमाण । यदि चाङ्गवैयर्थ्यानुपपत्त्या परमापूर्वकल्प्ये त, ततो विकृतिषु परमापूर्वकल्पनाभावेन द्वारलोपा त्तांगानि माप्नुयु । अत किं परमापूर्वसद्भावे प्रमाणमितिचेन्न:- दर्शपूर्णमासादौ तावत्फल

वाक्ये साहित्यविशिष्टानां षण्णां यागकरणतानां फलनिरूपितत्वाव गमात् तस्यच व्यापारमन्तरेणानुपपत्तेः तदपेक्षायां परमापूर्वकल्पनोपप त्तेः । नहि तत्रोत्पत्त्यपूर्वं समुदायापूर्वयो र्व्यापारत्वं सम्भवति, तेषां षट्साहित्यावच्छिन्न जन्यत्वाभावात् । फलनिरूपकतावच्छेदका वच्छिन्न जन्यस्यैव व्यापारत्वौचित्यात । यद्यपि चात्र प्रतियागं करणताभेद स्तदवच्छेद कानि चाग्नेयादीनि भिन्नान्येव, तथापि सर्वा सु करणतासु एका फलनिरूपकता, फलस्यैक्यात् ; तदवच्छेदकञ्च षट् साहित्यं । नच तदवच्छिन्नजन्यत्वमुत्पत्त्य पूर्वादीनां सम्भवति । अतस्तेषां व्यापारत्वायोगात् परमापूर्वसिद्धिः । नचैवं समुदायादिवा क्येष्वपि करणत्वश्रवणा त्तस्यच कार्यनिरूपितत्वा त्कार्यरूपापूर्वकल्प नवत् व्यापारापेक्षायां व्यापाररूपाणा मप्यपूर्वान्तराणां कल्पनापत्तिः ; अनेकापूर्वकल्पनाभिया समुदायादिवाक्येषु साधकतमत्वापरपर्यायानन्तर कार्योत्पादकत्वरूपस्यैव करणत्वस्य विवक्षितत्वात् । अनुशिष्टैव हि तादृशकरणतायां तृतीया पाणिनिनापि । फलवाक्येतु फलस्य का- लान्तरभावित्वेन तादृशकरणत्वस्य बाधा द्व्यापारवदसाधारणकारण त्वरूपा करणता वाच्या । नचासौ व्यापार मन्तरेण सिद्ध्यतीत्युक्तविधया परमापूर्वसिद्धिः ।

एव मंगाना मपि परस्परवहितानामेव मयोगविधिबलेन प्रधानो पकाररूपफलजनकत्वावगमा त्तस्यचा व्यवधानेनानुपपत्ते र्व्यापारापेक्षाया मवान्तरोपकारकाणां साहित्यावच्छिन्नाजन्यत्वेन व्यापारत्वायोगा त्परमापूर्वस्थानापन्न मेक मपूर्वं व्यापारत्वेन कल्प्यते । पार्थसारथे स्त्वेतदनिच्छतः परमापूर्वं मपि न सिद्ध्ये दिति ध्येयम् ।

यत्र त्वेकमेव प्रधानं पूर्वोत्तरांगविशिष्टं फलजनकत्वेन श्रूयते, तत्र फलस्य कालान्तरभावित्वेन व्यापारापेक्षायां कल्पितस्यापूर्वस्यापि सांगप्रधानोत्तरकालोत्पत्तिकत्वावगते र्युक्ता तत्रापि परमापूर्वसिद्धिः ।

ननु तत्रावश्यकत्वेनोत्पत्त्यपूर्वेणैव फलसिद्ध्युपपत्ते रपूर्वान्तर कल्पने गौरवमिति वाच्यम्, यागस्य फलजनकत्वश्रवणान्यथानुपपत्त्या कल्पितस्या पूर्वस्य यागप्रधानानन्तर मेवोत्पत्त्यसम्भवेन गौरवस्यापि प्रामाणिकत्वात् ।

ननु श्रौतस्वाच्छिकेनापि गौरवप्रतिसन्धानेन पूर्वमसिद्धस्यापि यागप्रधानानन्तर्यस्य बाध एव किं न स्यादिति वाच्यम्, तथात्वे श्रुताया स्वर्गफलकरणताया एव बाधापत्तेः ।

अस्तु वा तादृशस्थले उत्पत्त्यपूर्वादेव फलं, अंगानां च फलानुकूलयोग्यताजनकत्वम्; नचैवं-विकृतिषु परमापूर्वाभावा दतिदेशानापत्तिः, प्रकृतौ उत्पत्त्यपूर्वंगता व्यवहितकार्यजननानुकूलयोग्यताजनकत्वस्यैवा रादुपकारकांगकार्यत्वेन विवक्षितत्वात् । तच्चोत्पत्त्यपूर्वव्यवहितं क्वचित्समुदायापूर्वं क्वचित्परमापूर्वं क्वचित्फल मेवेति युक्तोऽतिदेशः । उक्त श्चायमपि पक्षो वार्तिककृता "केचिदाहु" रित्यादिना । अत एव दर्शपूर्ण मासादिष्वपि परमापूर्वं विनैव कलापूर्वैरेव फलसिद्धेर्न तत्कल्पन मित्यपि सुवचम् । सर्वथा सिद्ध मपूर्वम् ।

अस्य चाधिकरणस्य आक्षेपसमाधानरूपार्थस्य स्वातन्त्र्येण प्रयोजनकल्पने यतितव्यम् ! सूत्रन्तु आरम्भस्य इत्यारम्भो पूर्वं, तत्पुन रापाद्यते यागेन। यद्वा यागस्वर्ग साध्यसाधनभावस्य वाक्येन चोदनेति व्याख्येयम् ।

॥ इत्यपूर्वाधिकरणम् ॥ २ ॥

॥ अथ कर्मणां गुणप्रधानभावविभागाधिकरणम् ॥

॥ १ ॥ सू- तानि द्वैधं गुणप्रधानभूतानि ॥ २ - १ - ७ ॥

एवं तावत्सिद्धमपूर्वं, तच्च धात्वर्थादेवेत्यपि धात्वर्थस्यापूर्वजनकत्वेन द्रव्यादेस्तदर्थत्वमित्यपि च । इदानीं तदपवादः प्रस्तूयते । "व्रीहीनवहन्ति" "तण्डुलान्पिनष्टि" इत्यादाववघातपेषणादीनां स्वतन्त्रापूर्वार्थत्वं व्रीह्यादेस्तदर्थत्वं? उत तेषां वितुषीभावादिरूपप्रयोजनलाभाद्दृष्टार्थत्वम्, व्रीह्यादेस्तु अवघातादीन्प्रति प्राधान्यादेव तदर्थत्वम्? इति विचार्यते ।

सति च दृष्टार्थत्वे धात्वर्थभावनाभेदसत्त्वेऽप्यपूर्वभेदाभावात् अपूर्वभेदोपयोगिचिन्तनात्मकत्वेन पादाध्यायसंगत्यविघातः ।

तत्रावहन्तीत्यवघातभावनाया अन्योत्पादकस्वभावत्वेन जन्यभाव्यापेक्षायां सत्यपि व्रीह्यादीनां द्वितीयया कर्मत्वावगमे तेषामवघाताद्यजन्यत्वेन भाव्यत्वायोगान्न तावदवघातो व्रीह्यर्थः । नच स्वरूपेण व्रीहीणामजन्यत्वेऽपि वैतुष्यविशिष्टत्वेन भाव्यत्वोपपत्तिः, वितुषीभावजनकत्वेनावघातस्य लोकत एव प्राप्तत्वेन तदंशे विधिवैयर्थ्यात् । नच लोकतो विदलनादेरपि प्राप्तत्वेन तन्निवृत्तिफलकस्य नियमस्यैवायं विधिरस्त्विति वाच्यम्, तर्हि नियमेन वितुषीभावस्याप्यजननात्तद्वैशिष्ट्यरूपेणापि व्रीहीणां नियमं प्रति भाव्यत्वानुपपत्तेः । नहि नियमं प्रति वितुषीभावविशिष्टत्वेन भाव्यत्वानुपपत्तावप्यदृष्टविशिष्टत्वेन भाव्यत्वोपपत्तिः, अशाब्दनियमादृष्टकल्पनापेक्षया शाब्दादवघातादेव तत्कल्पनस्योचितत्वात् । नचास्तु तर्ह्यवघातादेव व्रीहिनिष्ठादृष्टकल्पनमिति न व्रीहीणामवघातार्थत्वसिद्धिः, अदृष्टे आत्मनिष्ठत्वेन प्रयाजादिजन्यादृष्टवदनपेक्षिताश्रये व्रीह्याश्रयत्वकल्पनापेक्षया अवघात एव द्रव्यापेक्षव्रीहिरूपद्रव्यविधिप्रतीतेः । अत एवापेक्षितविधिलाभाय प्रयाजशेषाभिघारण इव लक्षणया द्वितीया विभक्तिः करणत्वपरा अनीप्सितकर्मत्वपरा वा नीयमाना न दुष्यति । नच तथापि व्रीहिविधेस्तन्नियमविधेर्वा अवघातविधिवदेवानुपपत्तिस्तुल्येति वाच्यम्, अवघातजन्यादृष्टं प्रत्येव व्रीहिनियमविधेरुपयोगानुप

पत्तेः । यथा स्वयागस्य व्रीहिसाध्यापूर्वं प्रायुपयोगानीकारे व्रीहि साध्यस्य यागजन्यापूर्वस्य यागभावनायामेव भाव्यत्वेनान्वया द्वाव घातभावनायां भाव्यत्वेन तदन्ययद्दति अवघातजन्येप्सितरूप भाव्या भावप्रसंगः । तस्माद्व्रीहि विशिष्टोवघातएव प्रयाजादिवद् दृष्टार्थो विधीयतइति प्राप्ते- अभिधीयते ; यत्र दृष्टप्रयोजनं नसम्भवति तत्र युक्ता अदृष्टस्यापिकल्पना, आत्मनिष्ठस्यापि । यत्रतु दृष्टप्रयोजनसम्भवः यथा प्रकृते, न तत्र आत्मनिष्ठादृष्टकल्पना । अत एवोभयत्र क्रियां प्रति द्रव्यस्य यथा यथं गुणत्वं प्राधान्यंच, क्रियायाश्च द्रव्यम्प्रति प्राधा- न्यगुणत्वंच । अतो धात्वर्थरूपक्रिया प्रतिपादका न्याख्यातान्तानि पदानि यथा सम्भवं गुणप्रधानभावेन द्विविधानि विधेयानीति सूत्रार्थः ।

॥ २ ॥ सू - यैस्तु द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि द्रव्यस्य गुणभूतत्वात् ॥ २ - १ - ८ ॥

नन्वेवमपि दृष्टप्रयोजनासम्भवेन प्रधानकर्मता, तत्सम्भवेन गुणकर्मत्व, मित्याशंक्य पूर्वपक्षयुक्तप्रयाजदृष्टान्तवैषम्य प्रदर्शनार्थमनेन सूत्रेण कर्मणो लक्षणमुच्यते । येषांहि यागीय द्रव्यदेवतादि संस्का रार्थत्वं तदंगता बोधकप्रमाणाभावेन नेष्यते तानि कर्माणि स्वतन्त्रात्म निष्ठादृष्टजनकानि सन्ति द्रव्यादिप्रतिपादनभूतानि । द्रव्यादीनिच तत्र सिद्धसाध्यसमभिव्याहारे सिद्धसाध्यतयोपयुज्यते इतिन्यायेन तत्तात्कृ त्यैवता क्रियां प्रतिच गुणभूतं, यैस्तु द्रव्यंचिकीर्ष्यते गुणस्तत्र प्रतीयेत तस्य द्रव्यप्रधानत्वात । येषान्तु यागीयद्रव्यादि संस्कारार्थत्वं प्रमाण वशेन निर्ज्ञातं तेषां दृष्टप्रयोजनासम्भवे व्रीहीन् प्रोक्षतीत्यादौ अदृष्ट द्वारापि यद्द्रव्यसंस्कारार्थत्वं प्रोक्षणादे रभ्युपगम्यद्रव्यं प्रतिगुणकर्म त्व मुत्तराधिकरणे उपपादयिष्यते, तदा कोनामव्रीहीनवहन्तीत्यादौ पुरोडाशनिष्पत्त्यौपयिक वितुषीभावरूप द्रव्यप्रयोजनलाभसम्भवे अदृ ष्टकल्पनया प्रधानकर्मत्वमापादयितुं समर्थः । अतएव तत्र भावना

भाव्यमपि वितुषीभावविशिष्टत्वेन व्रीह्यस्य । चतुर्विधं हि सर्वत्रभाव्य मिष्यते । किञ्चित्स्वतएवोत्पाद्यत्वेन । यथासंयवनेनपिण्डः । किञ्चिदा प्तिविषयत्वेन । यथादोहनेनपयः । किञ्चिद्विकारविशिष्टत्वेन, यथाव घातेनव्रीहयः, तत्र वितुषीभवत्वाख्यो विकारोजन्यते । किञ्चित्सं स्कारविशिष्टत्वेन । यथातएव प्रोक्षणेनादृष्टरूप संस्कारजननात् । अतश्च व्रीहीणां स्वरूपेणभाव्यत्वायोगेपि युक्ता वितुषीभावविशिष्टत्वेन भाव्यता । नच वितुषीभावसाधनत्वस्य लोकतएव प्राप्तत्वा द्विधि वैयर्थ्यं, लोकस्याव्यभिचारितान्वयव्यतिरेकग्रहणसापेक्षत्वेन विलम्बितत्वा त्ततः पूर्वमेव विधिवाक्येन तद्विधानात् । तत्प्रयोजनंच विदलनादि व्यावृत्तिफलको नियमः । तस्यापि च प्रयोजनं दृष्टाभावाददृष्टं । तस्य चादृष्टस्य वितुषीभाव फलावघातोपजीविनियमजन्यत्वात्र कृष्णलचरौ वैतुष्यासम्भवे नियमावघातप्रयोजकत्वं । यदित्व शाब्दस्यानियमस्याद् ष्टजनकत्वानुपपत्तिराशंक्येत, ततो विधेयादेव अदृष्टं कल्प्यते । तच्च वितुषीभावस्य मुख्यफलत्वे स्यानुषंगिकत्वेन कल्प्यते, नत्वनुष्ठापक त्व रूपमुख्योद्देश्यतया, गौरवापत्तेः । अतएव कृष्णलचरौ वैतुष्य भावनादृष्टानुरोधेनावघातानुष्ठानं । उद्देश्यतावैजात्याच्च नोद्देश्यानेकत्व निमित्तको वाक्यभेदोपि । आर्थिकविध्यन्तर फलत्वाद्दानस्तः । अदृष्टस्यानुष्ठापकतापि चेतादृशी, यद्वैतुष्याभावे तस्यानुष्ठापनं नतु वैतुष्यसम्भवेपि, विदलनादे रप्यनुष्ठानापत्तेः । अतएव तद्व्या वृत्तिफलक नियमफलकत्वा न्नियमादृष्ट व्यवहारः ।

ननु नवमाधिकरणन्यायेन व्रीहिपदे अपूर्वसाधनत्वलक्षणाया आवश्य कत्वाद्यवघात विधे वितुषीभावस्वरूपेण नर्थक्येपि तज्जन्य प्रधानापूर्वस्या वघातं विनानुपपत्ते स्तदुपस्त्यपर्यालोचनावघातविधिसार्थक्यात्कृतं नियमादृष्टेन,

नियमादृष्टकल्पने वा तेनैवानर्थक्य परिहारोपपत्तेः कृतमपूर्वसाधनत्व लक्षणयेति चेन्न ;- अवघातं विना विदलनादिना वितुषीभावस्यैवा पूर्वानुत्पत्तौ प्रमाणाभावात् । नचावघाताभावे तज्जन्यवितुषीभावा भावा त्सामग्र्यभावः, अवघातविदलनजन्यवितुषीभावव्यक्त्यो वै· जात्ये प्रमाणाभावेनावघाताभावेपि तज्जन्यवितुषीभावसत्वा त्सामग्र्य भावासिद्धेः । नच कार्यकारणभावे व्यभिचारपरिहारार्थमेव वैजात्य कल्पना, अनेककार्यकारणभावादि कल्पनागौरवभिया द्वयोरेकशक्ति मत्वेन कारणतांगीकारात् । यत्रतु व्रीहियवाविवाक्ये कारणताद्वयं प्रमाण सिद्धं तत्रैव परमाग्नेयादौ वैजात्यकल्पनमिति वेषःमर्थाधिकरणेवक्ष्यते , नत्वत्र । अतश्चा पूर्वसाधनत्वलक्षणाया मप्यवघातविधिवैयर्थ्यस्य तदवस्थ त्वादवश्यमवघातेन वैतुष्यवददृष्टमपि व्रीहिनिष्ठमाधेयम् । अन्यथा अव घातस्या पूर्वसाधनतायानुपपत्तेः । नचैवमपूर्वसाधनत्वलक्षणावैयर्थ्यं, नियमादृष्टस्यापि व्रीहिरूपे अनुपयोगित्वेन प्रधानापूर्वार्थत्वावश्यंभावात् । अतस्सिद्धा अवघातस्य नियमादृष्टजनकत्वेपि दृष्टवितुषीभावद्वारा व्रीह्यर्थता, योग्यतारूपलिंगात् । द्वितीयाश्रुते नियमविधिलाघवाच्च । एवं द्वितीयविधि प्रकारांगीकरणा ल्लाघवम् । इतरथा विशिष्टविध्या श्रयणा त्पंचमप्रकारांगीकरणे गौरवंस्यात् । तस्मात्तावघातप्रयोजनी भूतादृष्टकल्पनं । शतधैतादृशस्थले धात्वर्थभावनाभेदसत्वेपि नप्रयोजनभि न्नापूर्वभेदः । प्रयोजनंपूर्वपक्षे प्रैष्यंगवश्चरुर्भवतीत्येत द्वाक्यविहितेयामे यागीयहविः प्रकृतिभूतव्रीह्यभावे ध्यतिदेशप्राप्तावघातांगत्वेन व्रीहय स्सम्पाद्या एव । यथातिदेशप्राप्तप्रयाजाद्यंगत्वेनाज्यं । नच प्रकृतौनिर्वा- पोत्तरकाल मवघातानुष्ठाना दवघातस्य परमयुक्तव्रीह्युपजीवित्वावगतेः प्रैय्यगवचरौ तदभावे अवघातस्यानुष्ठानमेव स्या न्न तदनुरोधेन

व्रीहिसम्पादनमिति वाच्यम्; अवघातस्य वाजिन न्यायाविषय त्वेन परमयुक्तव्रीह्युपजीवित्वासिद्धेः ।

तथाहि, न तावद्वाजिनन्याय विषयत्वं, दध्यानयनस्य ह्यामिक्षार्थत्वं यावदीयं न वाजिनार्थत्वं । अत आमिक्षाप्रयुक्तदध्यानयनानुनिष्पन्नत्वा द्वाजिनस्य नदध्यानयनप्रयोजकतेति न्यायः । नचासौ प्रकृते समस्ति, व्रीहीणां यागांगत्वस्ये वात्रघातांगत्वस्यापि वाक्यीयत्वाविशेषा द्वाजिनवदवघातस्या नुनिष्पन्नत्वाभावाच्च । नापि पदकर्मन्यायः, तत्रहि तेनाक्षमुपाज्यादिति तच्छब्दस्य सप्तमं पद मध्वर्यु रंजलिना गृह्णातीत्यत्र च पदशब्दस्य सापेक्षत्वायुक्तंपरमयुक्तक्रयांगभूतैकहायनीनियनोपजीवित्वं, प्रकृतेतु व्रीहिशब्दस्य प्रकृतानपेक्षत्वा न्न यागीयव्रीह्युपजीवितेति विशेषः। पुरोडाशकपाले नेतिवच्च प्रयोजकयुक्ताभिधानाभावा न्नपुरोडाशकपाल न्यायः । व्रीहिशब्दस्य स्वसम्बन्धकत्वाभावा न्नोत्तरार्धन्यायोपि । निनयनन्यायस्तु प्रतिपत्तित्वाभावा देवानाशंक्यः । नच गुणस्य दोहनादेः परमयुक्ताश्रयोपजीवित्वेना श्रयाप्रयोजकत्वात्, अव घातस्यापि यागप्रयुक्तव्रीह्याश्रयत्वा त्तदप्रयोजकत्वमिति वाच्यम्; प्रणयनादे र्हि गुणांगत्वे प्रमाणाभावेन गुणस्य तत्प्रयोजकत्वानुपपत्ते र्युक्ता तस्य परमयुक्तोपजीवकता, व्रीहीणांतु यागांगत्वस्येवाव घातांगत्वस्यापि वाक्यीयत्वाविशेषा द्विनिगमनाविरहेणैकस्येतर प्रयुक्तोपजीवकत्वानुपपत्तेः । नच निर्वापेण व्रीहीणां यागीयत्व निश्चयाद्यागप्रयुक्तत्वावगते र्विनिगमनसत्वेन तदुत्तरभाविनोवघातस्य तदुपजीवकत्वोपपत्तिः, एतत्पूर्वपक्षे निर्वापस्याप्या दादुपकारकत्वेनाव घाततुल्यात्वा तेन व्रीहीणां यागीयत्वनिश्चयानुपपत्तेः । नच निर्वा-

अत्र च सिद्धान्ते स्रुगादिनिष्ठापेय शक्तिरूपातिशयसद्भावेपि तस्यात्मनिष्ठादृष्टपदवाच्यत्वाभावा दपूर्वाभावेन पूर्ववदेवापूर्वभेदोपयोगि चिन्तनात्मकत्वा त्पादाद्यापत्तगति । प्रोक्षणादे स्संस्कारकर्मत्वे सति पुरोडाश मपूर्वकल्पना [त्पादर्भ] तद्भेदोपयोगित्वेन स्था । अनन्तरात्तु पूर्वाधिकरणसिद्धान्तहेतुभूत दृष्टोपकारकत्वमत्युदाहरणरूपेण पूर्वपक्षो त्थानादृष्टव्या ।

तत्र – पूर्वाधिकरणपूर्वपक्षन्यायेनैव स्रुगादे स्सम्मार्गाद्यजन्यत्वेन भाव्यत्वायोगा, दवघातवच्च दृष्टोपकारविशिष्टत्वेनापि तदसम्भवात्, स्रुगादिविशिष्टसम्मार्गादिविधान मेव प्रयाजादिवत् स्वतन्त्ररूपका-रभाव्यक युक्त माश्रयितुम् । नचावघातवद्योग्यतारूपलिङ्गात्सम्मार्गादे र्गुणकर्मत्वासम्भवेपि द्वितीयया स्रुगादीनां प्राधान्यावगमा दर्थात्सम्मार्गा दीनां तद्गुणत्वावगते दृष्टोपकाराभावे च तद्बलेनैवादृष्टस्य द्रव्य निष्ठस्य कल्पनोपपत्तेर्न स्रुगादिविशिष्टसम्मार्गादिविधानमिति वाच्य, द्विती याया प्राधान्यवाचित्वाभावेन गुणकर्मत्वासिद्धे । तथाहि–प्राधान्यवाचित्व किंप्रयोगानुसारादभ्युपगम्यते, अनुशासनानुरोधाद्वा? नाद्य, ' बल्वजान् शिखण्डकान् कुरु " " सक्तून् जुहोति " त्यादौ करणत्व एव द्वितीयादर्शनेन तदसिद्धे । नह्यत्र बल्वजादीना कर्मत्व सम्भवति, करोते र्द्विकर्मकत्वाभावेन शिखण्डकर्मावरुद्धे तस्मिन् बल्वजादीना कर्मत्वेनान्वयस्य वक्तुमशक्यत्वात् । जुहोतेश्च देवतोद्देश्यक प्रक्षेप द्रव्य त्यागसमुदायवाचित्वेन सक्तूना समुदायकर्मत्वानुपपत्ते स्सक्तू नामनीप्सितत्वे नैकदेशकर्मत्वस्याप्यनुपपत्तेश्च । अतोत्र बल्वजादीना द्वितीययाकरणत्वमेवाङ्गीकर्तव्यम् । ततश्चान्वय व्यभिचाराद्द्वितीयाया करणत्व एव शक्ति र्नप्राधान्ये । तथा प्रयाजशेषेणेत्यादौ द्वितीयाभा वेपि प्राधान्यदर्शनेन व्यतिरेकव्यभिचारादपि तदभाव निश्चय । नचैव घट करोतीत्यादौ करण त्वासम्भवेपि द्वितीयादर्शनात्तत्रापि व्यभिचार तादवस्थ्यमितिवाच्यम् विषयतासम्बन्धेन घटादेर्ज्ञानप्रतिकरणत्वमत्रास

प्रत्यपि तदुपपत्तेः; अतो ऽ व्यभिचारात्करणत्व मेव द्वितीयार्थः, नतु प्राधान्यमिति प्रयोगानुसारेण निर्णीयते । अत एव प्रयोगविरुद्ध मनुशासनमपि 'कर्मणि द्वितीये' त्यादिकं न प्राधान्यवाचित्वे प्रमाणम्। अतो न सम्मार्गादीनां द्वितीयया गुणकर्मत्वप्रतीतिः । नापि सप्रयोजनत्वमात्रेण, पुरोडाशकपालादीनां सप्रयोजनत्वेपि तुषोपवापसंस्कार्यत्वाभावात् । अतो गुणकर्मत्वावेदकप्रमाणाभावा त्पूर्वाधिकरण पूर्वपक्ष न्यायेन स्रुगादिविशिष्टसम्मार्ग विधिरेवायम् । सूत्रन्तु- "धर्ममात्रे"- दृष्टोपकाराजनक सम्मार्गादिरूपे, 'प्रयाजादिव' त्प्रधानकर्मत्वंस्यात्, द्रव्यनिष्ठोपकारस्य तेना 'निवृत्ते' रिति व्याख्येयम् ।

॥३॥ सू - तुल्यश्रुतित्वा द्वेतरैस्सधर्मास्स्यात् ॥ २-१-१० ॥

सत्यं दृष्टोपकारकत्वेन नास्यावघाततुल्यत्व, तथापि द्वितीयाश्रुति तुल्यत्वात् अवघातादिवद्गुणकर्मत्व सम्भवत्येव । तथाहि- द्वितीया प्राधान्याभिधायिनी व्रीहीणामिव स्रुगादीनामपि प्राधान्यप्रतिपादयन्त्य थावघातस्येव सम्मार्गादीनामपि गुणत्वंगमयति, अतश्च दृष्टोपकारकत्वाभावेपि द्वितीयावगतगुणकर्मत्वनिर्वाहार्थं द्रव्यनिष्ठादृष्टोपकारकल्पनेपि नक्षतिः ।

॥३॥ सू - द्रव्योपदेश इतिचेत् ॥ २-१-११ ॥

यत्तु – द्वितीयायाः प्राधान्यवाचित्वे प्रमाणाभावा त्प्रयोगानुसारेण करणत्वावगतेः सक्तुवत्स्रुगादि द्रव्यस्यैव सम्मार्गादि प्रत्युपदेशो विधानमित्युक्तम, तत्रोच्यते-

॥४॥ सू - तदर्थत्वा त्प्रोक्तव तस्य च [वि]शेषभूतत्वात ॥२-१-१२॥

न करणत्ववाचिनी द्वितीया, प्रमाणाभावात् । अपितु 'कर्मणिद्वितीये' त्यनुशासना त्कर्मत्वपरा । नचतस्यनिर्मूलत्वं, घटंकरोतीत्यादि प्रयोगस्यैव मूलत्वात । नहात्रत्यापि घटस्य विषयता सम्बन्धेन कृति

मानत्वेनाभिमतेन तेषां तत्क्रियाजनकत्वावगमात् । तत्तदङ्गानां विधौ तत्क्रियासाधकत्वेन स्वोपकारकत्वाभ्यासादीनां मङ्गीकृत्य तत्क्रियासु विनियोगकल्पनम् । एवमुत्तरत्रापि क्रियायोगावगमादर्थ उपात्तिप्रयोजनत्वावगमात् इष्टविधयोपकारकत्वस्य च लौकिकप्रमाणागम्यत्वात् तत्र तत्र संस्कारविधिप्रत्ययानुपपत्त्या विनियोगकल्पनम् । अतश्च द्वितीया सक्तुगतकारणत्वार्थैव ।

ननु सक्तूनां विनियोगकल्पनायोगेऽपि न द्वितीयाकारणत्वलक्षणार्था, अननुशिष्टलक्षणाया गौरवात्, किं त्वनीप्सितकर्मत्ववाचिका । अतश्च सक्तूनां कर्मत्वेनैवान्वय, तथ्यप्रविभागार्थं प्रथमतन्त्रान्तर्भावी, तथा सति परीक्षार्थाधिकरणे पूर्वपक्षन्यायेन सक्तूनाम विवक्षावभः, तथापि भावनाया भग होमादिना व्यवस्थान्वयेन कर्मत्वेनान्वये बाधास्य हायत्वम् नहि प्रत्यपादितम् हावयम्, सक्तूनां कर्मत्वस्य द्वेष्यत्वा भवितारात् । अतस्सक्तूनां मनीप्सित कर्मत्वेनैव न्वयोपपत्तेः करणत्वलक्षणेति चेन्न -भावनायाश्चिमात्रस्य नित्यं सकर्मकत्वेनैव कर्मत्वेन कर्मान्तरस्य न्वयानुपपत्तेः । अन्यथा तत्तमानार्थकस्य करोति रपि द्विकर्मकत्वापत्तिः । अथ करोति देवदत्तं कर्मत्वेऽपि भावनावाचित्वमात्रस्य द्विकर्मकत्वं युक्तम्, तत्तद्विशेषनदीत्यादौ कर्मान्तराभावा न्मायवानुपपत्तिः । अतएव पचत्यर्थे एण तण्डुलानित्यादौ विषयभावेनेप्सितकर्मान्तरे तेनैव सूनादिना मनीप्सित त्वेनान्वय, तद्विषयमेव च तथाप्युक्तम् विधित्वेऽपि पाक्रियालतां न्वयविषये । भावनान्वयस्तु विधितत्करणार्थमेव, भावयतीत्यत्रापि करणलक्षणा, बहुवगान् शिलण्डवान् कुर्यादित्यादौ करोति देवदत्तत्वेन कर्मान्तरान्वयानुपपत्तेः । अतश्च सर्वविधिप्रत्यये भावनान्वये द्वितीयकर्मण करणत्वेनैव । अतएव नैयायिकाभ्युपगमेऽपि प्रयत्नार्थत्यादौ नैयायिकानां नोद्देश्यत्वेन भावना-नया पक्षस्य करणत्वेनैव तत्-मर्यां मानसीप्सित कर्मागे नेतिध्येयम् ।

यत्तु – तन्त्ररत्ने तन्त्रसारन्यायसुधयोश्च 'यच्छुते स्सकर्मकत्वात् सुक्तोदण्डस्या नीप्सित कर्मत्वेना न्वयः, जुहोतेस्सकर्मकत्वात् सक्तूनां द्वितीयया करणत्वलक्षणे' त्युक्तं, तन्न, हुतोहुतः पर्यावर्तत इत्यादौ कर्मणिनिष्ठादर्शनेन जुहोतेरकर्मकत्वासिद्धेः । कर्मणि तृतीया चकाराद्द्वितीया चस्यादित्यर्थकेन तृतीयाच होश्छन्दसीति सूत्रकारव्यवहारेण सकर्मत्वावगतेश्च । तस्मादुक्त एवप्रकारः श्रेयान् ।

अत एव गुणफलाधिकारे इन्द्रियकामाद्यवरुद्धायां भावनायां होमस्यानीप्सितकर्मत्वरूपा श्रयत्वेनैव क्रियान्वयोंगीकृतः । अन्यथा तत्रापि तथात्वसम्भवे विशिष्टभावनाविधाने वाक्यभेदाभावा ज्जित प्राभाकरेण । तस्मादुक्त प्रकारेणैव सक्तुषु करणत्वलक्षणा मंगीकृत्य सक्तुविशिष्ट होमविधान मारादुपकारकतयेतिसिद्धम् । स्रुगादीनान्तु प्रयोजनवत्त्वस्य प्रमाणान्तरेणा वगतत्वात्तेषामेव भाव्यत्वोपपत्तेर्युक्तं संस्कारार्थत्वं सम्मार्गादीनामिति ।

नचैवं सर्वत्र सप्रयोजनत्वनिष्प्रयोजनत्वकृतमेव द्रव्यस्य क्रियां प्रति गुणप्रधानत्वमिति कृत द्वितीयातृतीयाभ्यामितिवाच्यं, 'ऐन्द्र्यागार्हपत्यमुपतिष्ठत' इत्यत्रहि सत्यप्यैन्द्रीगार्हपत्ययोः क्रतुसम्बन्धित्वेन प्रयोजनवत्वे द्वितीयैव गार्हपत्यप्राधान्येप्रमाणम् । नचतत्रापि द्वितीयाया नियामकमात्रत्वेपि कथ प्रमाणत्वमिति वाच्यं, द्वितीयाभावे मन्त्रस्यलिङ्गा दिन्द्रार्थत्वस्यैवावगमा त्तस्यानियामकत्वाभावात्, गार्हपत्यप्रातिपदिकमात्रसमभिव्याहारस्य च लिङ्गविरोधे सामीप्यनिरूपकत्वेनाप्युपपत्तेः । अतो लिङ्गबाधेन गार्हपत्य प्राधान्यं द्वितीयाप्रमाणकमेव । तथा सुक्तवाकप्रस्तरप्रहरणयो रुभयोरपि प्रयोजनवत्वाविशेषे केवलतृतीयाकृतमेव सुक्तवाकस्य प्रस्तरप्रहरणांगत्वं । अतश्च सत्यपि द्वितीयाश्रुतिप्रामाण्येनिष्प्रयोजनत्वा त्सक्त्वगुण्यपवादः । सत्यपिच तृतीयाप्रामाण्ये दृष्टार्थतया त्रपाजस्त्वाभिधारणस्यैव पवाद । अत स्सिद्ध मदृष्टार्थत्वेपि सम्मार्गादीनां गुणकर्मत्वम् ।

सूत्रन्तु नाद्वितीया गुणत्वपरा, अपितु प्राधान्यपरा, तदर्थत्वेन स्मृत्या नुशिष्टत्वात्, 'लोकवत्' – लोकसिद्ध घटादिपदवदनुशिष्टार्थ प्रतिपादकत्वस्योपपत्तेः नचैव सक्तुष्वपि तदापत्तिः तेषां द्विप्रयोजन कत्वात् प्रकृते तु तेषां स्रुगादीनां कृतौ शेषभावावगमात् प्रयोजन वत्त्व सिद्धे र्युक्तं गुणकर्मत्वमिति व्याख्येयम् ।

प्रयोजन मुदाहरणपूर्वपक्षे सम्मार्गसाधनीभूत स्रुचां प्रकृतौ विवक्षितसंख्यत्वा त्कपिञ्जलाधिकरणन्यायेन त्रित्वस्यैव शास्त्रीयत्वा त्पश्वादौ स्रुग्विवृद्धावपि तिस्र एव सम्मार्ष्टव्याः, सिद्धान्ते तु सत्कार्य त्वा त्सर्वा एव सम्मार्ष्टव्याः परिध्युदाहरणेऽप्येकस्यैव परिधेः पूर्वपक्षे सम्मार्गः, तैत्तिरीयशाखास्थ बहुवचनान्तवाक्योदाहरणे तु त्रयाणां सिद्धान्ते तु यावत्परिधि अग्नेरपि पूर्वपक्ष एकस्यैवाहवनीयस्य, सिद्धा न्ते त्वाहवनीयवृद्धौ सर्वेषाम् । यत्तु वार्तिके 'पूर्वपक्षे अग्नि मुप निधाय स्रुव इतिव लौकिकस्याग्नेः सम्मार्गः, सिद्धान्ते त्वाहवनीया दीनां सर्वेषा' मिति प्रयोजनमुक्तम्, तदग्नि सम्मार्गविषयस्य कल्प सूत्रकारवचनस्य मूलभूतश्रुत्या आहवनीयमात्र विषयिण्यानुपसंहाराभि प्रायेण, यदा तु तेनाहवनीयमात्र विषयक सामान्यवाक्यस्योपसंहार स्तदा सिद्धान्तवत् पूर्वपक्षेऽप्याहवनीयस्यैव सम्मार्गः सिद्धान्तेऽपि च गार्ह पत्यादीनामपि सम्मार्गः पूर्वोक्तमेव प्रयोजनं द्रष्टव्यम् । एवं पुरोडा शोदाहरणेऽपि पूर्वपक्षे एकस्यैव, सिद्धान्ते तु सर्वेषां पर्यग्निकरणमिति द्रष्टव्यम् । तथा श्यामाकानामपनेतरक्षमया त्सवनीया पुरोडाशा भव न्त्यत्र पूर्वपक्षे पर्यग्निकरणार्थत्वेन पिष्टमय पुरोडाशस्सम्पादनीय, नच तत्रापि पुरोडाशोद्देशेन मांसविधानात्सवनीय पुरोडाशवत् पर्य ग्निकरण पुरोडाशेऽपि मांसप्राप्त्युपपत्तेर्न पिष्टमयोत्पादन, तृतीये पुरोडाशपदस्य जघन्यस्य धानादिपञ्चके लिङ्गसमवायेन वृत्तिमगृह्णत्य सवनीयमात्रोद्देशेनैवेतर सविधानस्य वक्ष्यमाणत्वेन पर्यग्निकरणपुरोडाशे

संदप्राप्तेः । नचैवमपि सवन मध्यवर्तित्वेन तस्यापि सवनीय पदाभिधेयत्वोपपत्तेः मांसप्राप्त्युपपत्तिः, सवन मध्यवर्तिनि दधि धानादौ सवनीय पदमयागाभावा द्योगरूढ्या सवनीयपदस्य धानादियागपञ्चक वाचित्वाव गतेः । अतश्च पर्यग्निकरण पुरोडाशे मांस प्राप्ते रभावा त्पुरोडाशपदस्यच लोके पिष्टपिण्डवाचित्वा त्पिष्टपिण्डरूप एव पुरोडाशस्सवनीय. । तत्रापि च नव्रीहिमयत्व यवमयत्वयो नियत, प्रकृते व्रीह्यादिवाक्ये पाणीयपुरोडाशोद्देशनैव तद्विधानाद् । सिद्धान्तेतु क्लृप्त दर्शपूर्णमासप्रकृतिक सवनीययागपञ्चकोद्देशेन मांसविधा नात् प्रदेयपुरोडाशादिस्थानापन्नत्वात्तद्धर्मप्राप्ते पुरोडाशादि चतुष्टय स्थानापन्ने मांसे पर्यग्निकरण भवत्येव ।

यद्यपि च प्रदेयत्वेन मांसविधाना दथलोपात्तु नावदानप्रेषणादिधर्म प्राप्तिर्मांसे सभाव्यते, तथापि प्रकृतौ पर्यग्निकरणस्य प्रदेय पुरो डाशधर्मत्वावगते मांसे प्राप्त्यात्येवलत् । नचैव प्रेषणाद्यभावे तद र्थाविवापमन्त्रस्य धान्यमसीत्यस्यो ह्यानूहचिन्ता नवमेनिराकरिष्यमाणा निर्विषयापद्येतेतिवाच्य, तस्याः कृत्वाचिन्तात्वेनोपपत्तेर्वक्ष्यमाणत्वात् ।

यत्तु न्यायसुधाकृता सवनीयपदापेते वाक्ये अधिवापप्राप्त्यभावेपि छान्दोग्यशाखास्थे एतेनचैव गौरसीति शाक्यतरसमय पुरोडाशोपत्या वृत्त्या सर्वान्व्रीहिमान्प्रोक्षेदिति वचने सवनीय पदाभावा त्पुरोडाश पदेनैवच तत्कार्योद्देशे लक्षणावृत्त्या पुरोडाशमात्रोद्देशेन मांस विध्यवगते मांसेन च पिष्टपिण्डरूप पुरोडाशस्य कर्तुमशक्यत्वेपि तस्य पुरोडाशमन्त्र सद्योधा दिति छान्दोग्य श्रुद्वचनादन्नमिश्रितेन पुरोडाशापन्नत्त स्त्याचाधिवाप प्राप्तौ तन्मन्त्रोहानूह चिन्तोपपत्तिरित्युक्त । तन्न, पुरोडाशपदेनाथ पिण्डमात्र वा प्रतिपाद्यते लक्षणया, पिष्टपिण्डोवा? नाद्य, लक्षणापत्तेः । नद्वि तीयः, तस्यान्नमात्रोपादानस्य मांसप्रकृतिकत्वानुपपत्तेः । तस्मात्पिष्ट पिण्डप्रकृतिकस्यैव मांससंस्कारकत्वेन विधीयते । ततश्च " पयसाभि श्रावयेण श्रीणातौ " ति वाससंस्कारके तस्मिन् प्रदेयप्रकृतिधर्माणा

पेषणादीना मप्राप्तिनोंहचिन्तोपपत्ति । अतश्च कृत्वाचिन्ता स्वेनैव तदधिकरणोपपत्ति । ततश्च स्तवनीयपदापेतवाक्ये पेषणाद्यप्राप्तावपि पर्यग्निकरणप्राप्तिस्त्वा त्प्रयोजनोपपत्ति ।

यत्तु भाष्यकारेण स्रुगुदाहरणे पूर्वपक्षे वरुणप्रघासेषु शमीमय्य स्स्रुचोभवन्ति हिरण्मय्योवेतिवाक्योक्त शमीमयत्वादीना प्रधानाग भूतस्रुगनुवादेनैव विहितत्वा त्सम्भागांगभूतस्रुक्षु प्रकृतिप्राप्तनाना वृक्षीयत्व, सिद्धांतेतु स्वकार्यत्वाच्छमीमय्यादीनामेवसमार्गं इति प्रयोज नमुक्तम् । तन्न, स्रुङ्मात्रानुवादेन शमीमयत्वविधाना त्प्रधानस्रुक्ष्वि व त्समार्गस्रुक्ष्वपि शमीमयत्व प्राप्त । नच प्रियगुवत्प्रकरणा त्प्रधा नमात्रलाभ, प्रकरणस्य वाक्य सकोचकत्वानुपपत्ते । प्रिय गूनांतु व्य हुद्देशेन विहितानामपि चरा प्रधानमात्रसबधित्वेन विधानाद्युक्त प्रधानमात्र गामित्वम् । अतश्च यथैव येषा दर्वीष्या खादयतीत्यादौ प्रधान प्रकरणेन हविश्शब्द सकोचायोगा दानर्थक्य परिहारस्योप स्थित्यविशेषा दगप्रधानसाधारणा पूर्वसाधनी भूतहविर्मात्र लक्षणया प्युपपत्त नैवयादे प्रधानमात्रगामित्व तथैव प्रधान प्रकरणेन स्रुक्छब्द सकोचायोगा दति देशसहकृतेन च प्रधानवाक्येनोभयो रुपस्थित्यवि शेषा दुभयागत्व शमीमयत्वादीना । नचातिदेशेन समार्गस्य कल्प्योप कार नानावृक्षीय स्रुग्विशिष्टस्यैव प्राप्तत्वा त्तद्बाधाय स्रुक्पदस येचोपपत्ति, प्राकृत नानावृक्षीयत्वा बाधाय स्रुक्पदसकोचागीकारे अग गुणविरोधन्यायेन प्रधानस्रुक्षु नानावृक्षीयत्वानुग्रहेण सम्भागादिस्रुक्षे व शमीमयत्वादि निवेशोपपत्त ।

वस्तुतस्तु " अश्वपदवृषेनचरन्ति " ति वहुपदेशेन प्रधानगता स्विव सम्भागगतास्वपि स्रुक्षु शमीमयत्वादि विधानात् प्रयाजादिगता स्विव तद्गतास्वपि प्राकृतनानावृक्षीयत्वबाधोगुणएव । नहीद सुद्गात् पेदस्य श्यनप्राकृतांगेषुद्गातृत्वत्वस्वत्व त्प्रयागविधिद्वारक प्रधानाश्रि तप्राप्तेस्त्वन्तरति. येनातिदेशापेक्षया. दौर्बल्यंशङ्क्येत । अङ्गप्रधानसाधा,

रेण स्रुङ्मात्रानुवादेन विधानादपामिवास्याप्यौपदेशिकत्वात्प्राबल्य मिष्टमेव । अतश्च यथैव प्रयाजादिस्रुक्षु शमीमयत्वप्राप्ति रुपपादनीया, तथा सम्मार्गस्रुक्ष्वपीति नास्य प्रयोजनत्वोपपत्तिः ।

यत्त्वत्र वार्तिकेऽभ्युपगम्यापि यथा कथंचिच्छमीमयत्वादेः प्रधान सम्बन्धं न सम्मार्गस्रुक्षु नानावृक्षीयत्व प्राप्तिस्सम्भवति, प्रधान स्रुग्भिरेवांगानामपि प्रसंगात्कार्यसिद्धेः स्वतन्त्रस्रुगाक्षेपकत्वानुपपत्तेः, अतश्च यथैव दक्षिणास्सोमस्येति वचनात्प्रधानमात्रांगभूतयापि दक्षिणया प्रसंगात्कार्यसिद्धेर्नांगभूतेष्टिपशुष्वातिदेशिकान्वाहार्यदक्षिणाप्राप्ति रिति द्वादशे वक्ष्यते, तथैव प्रधानस्रुग्भिरेव प्रसंगसिद्धेर्नसम्मार्गार्थं नानावृक्षीयस्रुगुत्पादनमिति दूषणान्तरमुक्तं । तन्न, सौमिकपात्रैरैष्टिकपात्रकार्यस्येव शामित्राग्निना पौरोडाशिकाग्निकार्यस्य पाकस्येवात्र सम्मार्गस्य प्रधानस्रुग्भिस्सिद्ध्यनुपपत्तेः । दक्षिणायाह्वानतानां कर्तॄणां मगप्रधान साधारण्यादानतिरूप कार्यसिद्धेः प्रत्यक्षत्वा युक्ता तत्साधनीभूतान्वाहार्यनिवृत्तिः, प्रकृते तु स्रुग्भि प्रधाननिष्पत्त्या सम्मार्गानिष्पत्ते स्सम्मार्गस्य पृथगनुष्ठेयत्वायुक्तमैष्टिकपात्रवत्स्वांगभूतस्रुगाक्षेपकत्वम् । नच यथा सोमागभूत महावेद्यैवैष्टिक हविरासादनादिकार्यस्य पृथगनुष्ठेयस्याप्यनुनिष्पादनात्तदंगभूतदार्शपूर्णमासिक वेदिनिवृत्ति द्वादशे वक्ष्यते तथात्रापि सम्मार्गस्य पृथगनुष्ठेयत्वेपि प्रधानस्रुग्भिरेव निष्पादनोपपत्ते र्ननानावृक्षीयत्व प्राप्तिरितिवाच्यम् ; सौमिकवेदेर्देशत्वेनांगप्रधानार्थत्वस्य तृतीयेवक्ष्यमाणत्वा द्धविरासादनादिकार्यांगत्वेन तस्या एवप्राप्तेः आतिदेशिकैष्टिक वेदेरुपदेशेन बाधोपपत्तेः । नचैवं वेदेस्तन्त्रत्वापत्तेर्द्वादशोक्त प्रसंगानुपपत्ति., तस्य इयतिशक्ष्यामहेरयां कर्तुमित्यार्थवादिक कर्तृगमनागमनादि रूपप्रचारार्थत्व कृत्वाचिंतया कर्तृप्रचारार्थाया वेदेर्हविरासादन सिद्ध्यर्गाकारेण वक्ष्यमाणत्वात् । नचैवमपि पात्रन्यायेन हविरासादनरूपस्य कार्यस्य पृथगनुष्ठेयत्वा त्प्रसंगोपपत्तिः, कर्तृप्रचारार्थमनुष्ठितेनैव सौमिकवेदिकरणेना दृष्टविशेषावच्छिन्नादवनीय प्र

त्यग्देशरूपाया वेदेः सिद्धत्वात् दैष्टिकवेदिकरणनिवृत्त्या प्रसङ्गोपपादनात् । न ह्यैष्टिकलौकिकवेदिकरणभेदे वेदिभेदस्समस्ति, प्रत्यग्देशस्य प्रत्यक्षेणैकत्वात् वेदिपदस्य नानार्थकत्वकल्पनायोगात् अदृष्टस्यापूर्वस्यैव कल्पनाच्च । अतएव तत्तत्क्रत्वपूर्वसाधनीभूतवेदिरूपादृष्टत्वेनैव तत्तद्वेदिकरणं प्रति कार्यत्वात् व्यभिचारस्सङ्करो वा नाशंक्य । पात्रेषु लौकिकापेक्षया ऐष्टिकानां भेदस्य संपादयितुं शक्यत्वात् प्रसङ्ग इति वैषम्यम् । अतश्च पारम्पर्येण प्रधानस्रुगपेक्षया सम्मार्गस्रुचो भेदेन वक्तुं शक्यत्वाच्च प्रसङ्गोपपत्तिः । न च प्रसङ्गासंभवेऽप्याग्नेयीन्यायेन प्रकृतानामेवोपादानाशङ्का तस्य प्रकृतिप्राप्तनानावृक्षीयत्वबाधकत्वेन वैगुण्यप्रसङ्गेनानुदयात् । अतश्च वार्तिके प्रसङ्गापादनमनास्थयैवेति द्रष्टव्यम् ।

इदमिहावक्तव्यम्, यथाहि चक्षुर्मयत्वादेः प्रधानमात्रसंबन्धाभ्युपगमे प्रकृतौ नानावृक्षीयत्वस्यापि प्रधानमात्रसंबंधापत्तेः सम्मार्गस्रुक्षु नानावृक्षीयत्वस्यैवाभावात् द्रव्योक्तप्रयोजनानुपपत्तिरिति ।

एतेन यदपि परिध्युदाहरणे 'वारणाः परिधयो भवन्ति' इत्यत्र पूर्वपक्षे सम्मार्गार्थं पालाशा उत्पादयितव्याः, सिद्धान्ते वारणा एव सम्मार्ग इत्युक्तं प्रयोजनमपास्तम्, वारणत्वस्याङ्गप्रधानसाधारण्येन विधानादन्यपालाशादावपि सम्मार्गपरिधिष्वप्राप्तेः । किञ्च परिधीन् सम्मार्ष्टीत्यत्र परिधिशब्देन परिधीयतेऽनेनेति व्युत्पत्त्या अग्निपरिधानोपयोगिद्रव्याभिधानात्पुरोडाशकपालन्यायेन पालाशप्रयोजकत्वाच्चोक्तप्रयोजनसिद्धिः ।

यदपि साम्न्युदाहरणे अवभृथेन चरन्तीत्यत्र पूर्वपक्षे सम्मार्गोऽपि कर्तव्यः सिद्धान्ते त्वपामिति प्रयोजनमुक्तम्, तदपि अवभृथे तस्यापूर्वत्वेन तदर्थं श्रूयमाणप्रयाजानूयाजार्थत्वात् आरादुपकारकसम्मार्गप्राप्त्यभावात् यथाकथंचिदभ्युपगमेऽपि तृतीयान्तेन अवभृथपदेन योगस्यैव करणत्वावगमादवभृथमयनेन च साम्नस्यैव प्रयोगविधानादपि

चोदेशत्वात् साङ्गप्रधानविषयत्वस्यैकादशे वक्ष्यमाणत्वात् सम्मार्गस्यापामेव प्राप्तेरुपेक्षणीयम् । अतः पूर्वोक्तान्येव प्रयोजनानि द्रष्टव्यानि ।

इति सम्मार्गाधिकरणम् ॥ ६ ॥

अथ स्तोत्रादि प्राधान्याधिकरणम् ।

॥ १ ॥ मू — स्तुतशस्त्रयो स्संस्कारो याज्यावद्देवताभिधानत्वात ॥
॥ २ १ १३ ॥

इह स्तोत्रशस्त्राण्युदाहरणं । तत्र प्रगीतमंत्रसाध्य गुणगुणिसंबंधकीर्तनं स्तोत्रं, शस्त्रं च तदेवाप्रगीतमन्त्रसाध्यं । तत्र किं तयो रारादुपकारकत्वं प्रयाजादिवत, उतदेवतादिरूप गुणिस्मरणार्थत्वेन सन्निपत्योपकारकत्वमिति विचारः । अत्र पूर्वभेदोपयोगिचिंतनात् पादाध्यायसंगतिः पूर्ववत् । अनतरात्तु पूर्वाधिकरणे श्रुतिग्रहणस्य द्रव्यागताबोधकप्रमाणमात्रोपलक्षणत्वादिहापिगुण्यगताबोधकलिंगसद्भावेन पूर्वपक्षकरणादापवादिकी ।

तत्र यद्यपिविषयतासंबंधेन गुणगुणिनोरुभयोरपि संबन्ध कीर्तनाख्य स्तोत्र शस्त्र प्रति करणत्वमस्ति, तथापि प्रयोजनापेक्षायां दृष्टविधया कर्मानुपयुक्तगुणप्रकाशनार्थत्वायोगेपि कर्मोपयुक्तगुणिस्मरणार्थत्वसंभवे अदृष्टार्थत्व कल्पनानुपपत्ते र्गुणिस्मरण रूपसंस्कारार्थत्वमेव याज्यादिव स्तोत्रशस्त्रमंत्राणामंगीकर्तव्यम् । नचात्र स्तौतिशंसतिभ्यां विनियोगेन याज्यादिवैलक्षण्ये स्तौतिशंसत्योश्चगुणविशेष्यक गुणिसंबंधकीर्तनवाचित्वस्य लोके प्रसिद्धत्वा द्गुणिप्रकाशनार्थत्वे च तस्यैव विशेष्यत्वेन तयोर्लक्षणापत्ति रितिवाच्यम् , प्रयाजशेषेण हर्वींष्यभिघारयतीतिवद्दृष्टार्थत्वानुरो

येन लक्षणाङ्गीकारस्य न्याय्यत्वात् । अतस्सन्निपत्योपकारकत्वमेव स्तोत्र
शस्त्रयोरपि । सूत्रनिगदव्याख्यातम् ।

॥२॥सू – अर्थेनत्व पकृष्येत देवतानामचोदनार्थस्य गुणभूतत्वात् ।
॥ २ १ १४ ॥

प्रस्तुताव न्मूलयुक्तिभूत श्रुतिविरोधो लिङ्गस्य बाधक, अभ्युच्चय
युक्तिरूपो दुर्बलप्रमाणबाधप्रसङ्ग एष तावद्वादावभिधीयते । यदीहस्तो
त्रशस्त्रयो प्रकाशनलक्षणार्थता मङ्गीकृत्य तन्मन्त्राणां गुणिस्मरणार्थत्वमि
ष्यते ततामहेन्द्रदेवताकयागाभ्यासक्रमेपठितयो रैन्द्रमन्त्रयो र्माहेन्द्रप्रकाश
नाशक्ते रिन्द्रस्य च यागानङ्गत्वेन प्रकाशनानर्हत्वा त्प्रकरणेन यैन्द्रीदेवता
तत्रोत्कृष्येत पूषानुमन्त्रण मन्त्रवत् । ततश्च यजुर्वेदविहितग्रहयागाभ्यास
क्रमेण सामवेदान्तर्गतोत्तरा ग्रपठितानां मृचां यथाक्रमपाठनाव गतांगभा
वानां मध्येऐन्द्रमन्त्रयो स्तदनङ्गीकारात्क्रमबाधापत्ति । पाद पुनरा
रभत इति वचनावगतस्य चाद्यामृचं सकृत्पठित्वा द्वयोरत्यपादेन सहद्विती
याधर्चं पठित्वा तदत्यपादेन सहद्वितीयात्यार्धं चपठनरूपस्य प्रग्रथ
नस्य माहेन्द्रग्रहसन्निधावाम्नातस्य तदङ्गत्वानङ्गीकारा त्सन्निधिबाधश्च ।
अतश्च दुर्बलया रपि क्रमसन्निध्यो प्रबलेनापिलिङ्गेन सहाबाधेनैवोपपत्तौ
बाधायोगा त्सन्निपत्योपकारत्व स्तोत्रशस्त्राणां । सूत्रन्तु देवतापद प्रति
गुणत्वेन प्रयुक्तता यदि स्तुतिभावना ततोऽर्थेन प्रयोजनानुरोधेन माहेन्द्रग्र
हयाजितोपकृष्येतैन्द्रीस्तुति, तस्या प्रयोजनभूता देवतां प्रतिगुणत्वादिति
व्याख्येयम् ।

॥ ३ ॥ सू – वशावद्वागुणार्थं स्यात् ॥ २ १ - १५ ॥

नापकृष्येतैन्द्रीस्तुति, रिन्द्रशब्देनैव प्रकृतग्रहयागीयेन्द्र प्रकाशनोप
पत्ते यद्यपि च तत्र महत्त्वगुणविशिष्टस्यैवेन्द्रस्य माहेन्द्रमिति त
द्धितेनदेवतात्वमुक्तं, तथापिविशेष्यस्यैव मन्त्रेण प्रकाशनोपपत्ते विशे

षणांशस्यच मंत्राभावेपि ध्यानाद्युपायांतरेण स्मृतिसिद्धे नोपकर्षापत्तिः । नहि "सावा एषासर्वदेवत्यायदजावशा । वायव्यामालभेते"ति वाक्येन वशात्वगुणविधानेपि विशेष्यमात्रस्य छागस्यवपायामेदस इतिमंत्रे णाभिधान नेष्ट । नह्यत्रमहेंद्रशब्दस्यैव देवतात्वं, येनेन्द्रशब्दस्य ततोभि न्नत्वेना पकर्षश्शक्येत, तथासति महेद्रशब्दस्यार्थवत्वाभावेन प्रातिपदिक सज्ञाभावात्तद्धितानुत्पत्ति प्रसंगात् । अतएव चेतनाचेतन साधारण्येनार्थ स्यैव देवतात्व दशमे वक्ष्यते । एवं सत्यपि यदिमहेद्रशब्दोरूढ्या अ- र्थांतरवचनःस्या त्तमोर्थांतरवचनेनेंद्रशब्देन नाभिधीयते तदर्थ इत्युत्क र्ष्येतैंद्रोमन्त्रः, प्रोक्षणीशब्दवत् क्लृप्तावयवयोगेनोपपत्तौ नार्थांतरक ल्पनाया प्रमाणमस्ति ।

ननु तद्धितसमासरूपवृत्ति द्वयानुपपत्तिरेव रूढिकल्पनायां प्रमा णं भविष्यति । तथाहि – नतावदेकस्यैवेन्द्रशब्दस्य युगपत्तद्धितसमा सरूपवृत्तिद्वयसम्भवः, अन्यतरत्वापेक्षत्वेनैकस्या अपि वृत्तेरनुपपत्तेः, स मासवृत्त्यर्थ मिन्द्रशब्दस्य सुबन्तत्वकल्पना तद्धितवृत्त्यर्थं चा सुबन्त त्वमिति युगपद्वृत्तौ युगपत्सुबन्तत्वा सुबन्तत्वविरोधापत्तेश्च । नापिक्रमेण, सकृच्छ्रुतस्येन्द्रशब्दस्या वृत्त्यापत्तेः । तद्धितपूर्वमवृत्तौमहेन्द्र मित्युत्तर पदवृद्धि र्महत्त्वस्यप्रधानभूतद्रव्यविशेषणत्व बाधक मसज्येत । अतो वृत्तिद्वयानुपपत्त्या अश्वकर्णादिशब्दव द्रूढिकल्पनोपपत्ते रिन्द्रान्महेन्द्रस्य भेदावगमात् इन्द्रशब्देनप्रकाशनानुपपत्ते रुत्कर्षानिवारणमिति चेत् ? समासवृत्त्युत्तरकाल तद्धितवृत्त्यगीकारात् । नचैव मिन्द्रपदावृत्तिः, वृत्तिद्वयविवरण वेळायां पौरुषेयेन्द्रपदावृत्तावपि वैदिकमाहेन्द्रपदेनानावृत्ते नैव महत्त्वगुणविशिष्टेन्द्रदेवतात्वविध्युपपत्तेः । अतएव तद्धितवृत्तेः पूर्वं द्वन्द्वादि समासांगीकारात् " आग्नावैष्णव " मित्यादौ देवताद्वन्द्वादि निमित्तकानद्याद्युत्पत्ति रांजस्येनोपपादिता भविष्यति । अतश्चक्रमेण वृ त्तिद्वयस्याप्युपपत्तेः प्रोक्षणीशब्दवत्क्लृप्ता वयवयोगेनोपपत्ते रूढिकल्पना

नवकाशात्तथापि गुणविशिष्टस्येन्द्रस्य देवतात्वे यशाविदिन्द्रशब्देनविशेष्यमात्र प्रकाशनोपपत्ते र्नोत्कर्षापत्तिः ।

वस्तुतस्तु महेन्द्रप्रातिपदिकेन महत्त्वविशिष्टे इन्द्रे उक्तेपि रागपुरुषशोभनइति यद्विशेष्यमात्रस्यैव तद्धितेन देवतात्वावगमाद्विशेषणस्यच महत्पदस्य विशेष्योपलक्षणार्थत्वेन स्तावकत्वेनोपपत्ते र्देवताभूतस्य शुद्धस्येन्द्रस्येन्द्रेण प्रकाशनोपपत्तौ नोत्कर्षापत्ति ।

सूत्रन्तु अगुणार्थं स्यादित्यधिकार प्रश्लेषेण व्याख्येयम् ।

॥८॥ सू नश्रुतिसमवायित्वात् ॥ २ - १ - १६ ॥

नेन्द्रशब्देन प्रकृतग्रहसम्बन्धिदेवताभिधानं, प्रकृतग्रहेमाहेन्द्रमिति तद्धितप्रकृतेन विधिना महेन्द्रपदस्यैव दवतात्वविधानात् । तथा हि- तद्धितेनदेवतात्वविशिष्टद्रव्याभिधानात् देवतात्वस्यच यज्यमानहविरुद्देश्यत्वेन वृद्धव्यवहारे प्रसिद्धस्यानुच्चार्येये ऽसम्भवात् तद्धिताभिहितोद्देश्यत्वान्वयार्थं महेन्द्रप्रातिपदिकेन लक्षणया महेन्द्रपदमत्राभिधाय तस्य यज्यमानहविरुद्देश्यतारूप देवतात्व विधीयते । महेन्द्रशब्दे पदलक्षणायाश्च शब्दसम्बन्धविनानुपपत्त र्महेन्द्रपदशब्दस्य श्वेताश्वेतत्व साधारण्येन दशमे वक्ष्यमाणोर्थोपि गाहगतः । अतश्च महत्त्वगुण विशिष्टेन्द्रवाचकमहेन्द्रपदस्यैव देवता वावगमा द्विशिष्टवाचकवृत्रघ्नादि पदान्तरप्रयोगे सुतरां शुद्धेन्द्रपदप्रयोगायोगा न्नेन्द्रपदेन प्रकृतग्रह सम्बन्धिदेवताप्रकाशनोपपत्तिः ।

यत्त - न्यायसुधाग्रन्थस्वारस्या त्प्रातिपदिकेनार्थवाचिना उद्देश्यान्वयार्थं पदविशिष्टार्थलक्षणामङ्गीकृत्य तत्र तद्धितवाच्य देवतात्वान्वयो गौरवाच्छब्दोपहितेर्थो देवतेतिप्रतीयते, तत्पदविशिष्टेर्थे उच्चार्यत्वाख्योद्देश्यत्वस्य बाधाद्विशेषणीभूतपदान्वयस्य चान्योपसर्जनमन्येन नान्वेतीतिन्यायेना ऽयुक्तत्वा दुपेक्षणीयम् ।

एतेनार्थस्यैव देवतात्वेपि तस्यग्रीष्मादिवत्स्वरूपेण यागोपयोगाभावा ल्लक्षणोच्चारणद्वारेणैवोपयोगावगते शब्दविशेषापेक्षाया [illegible]

घवादुपस्थितस्य विधिगतशब्दस्यैव नियमइति पक्षोपिमरयुक्तः, तद्धिता र्थस्य स्यज्यमानद्रविरुद्देश्यत्वाद्व्यस्यार्थे बाधेनान्वयानुपपत्ते, स्यज्यमान द्रविरुद्देश्यभूतशब्दाभिधेयत्वलक्षणात् प्रधानभूते तद्धिते लक्षणापत्ते स्यु स्तैव । तद्वर प्रातिपदिकएव गुणभूते पदलक्षणेति ।

किञ्चैवं " अग्नयेपावकाये " त्यादा वेकस्यैव पदस्योच्चारणनियमो पपत्तेः न पदद्वयोच्चारणापत्तिः अतो महेन्द्रपदस्योच्चार्यत्वेन देवतात्वा श्चेन्द्रमन्त्रेणाभिधानोपपत्तिः, अतश्चोत्कर्षापत्ति स्तदवस्थैव ।

सूत्रन्तु-श्रुत्या-विधिगत शब्देनैव, देवताया, कर्मणि, समवायात्- सम्बन्धादिन्द्रशब्देन महेन्द्रप्रकाशनानुपपत्ते र्ना नुत्कर्ष सम्भवइति व्याख्येयम् ।

॥ ५ ॥ सू - व्यपदेशभेदाच्च ॥ २ - १ - १७ ॥

इतश्च नैन्द्रपदेन महेन्द्राभिधानं । अन्यथा साान्नाय्ये "बहुदुग्धीन्द्राय देवेभ्यो बहुदुग्धि महेन्द्रायदेवेभ्य " इति द्वयोर्मन्त्रयो स्समाम्नातयो रन्योन्य प्रकाशकत्वे विकल्पापत्तिः । अस्मन्मते त्वैन्द्रेण सान्नाय्य गतेन्द्र प्रकाशना न्माहेन्द्रेणच तद्गतमहेन्द्रप्रकाशना न्मन्त्रद्वयव्यपदेशव्यवस्थेति न विकल्पः । अतश्चे न्द्रमहेन्द्रयो रधिष्ठानैक्येपि विशेषणांशभेदादुद्दे श्यशब्दभेदाच्च भेदावगमे नैन्द्रमन्त्रेणाभिधानानुपपत्ते रुत्कर्षा निवारणम् ।

॥ ६ ॥ सू गुणश्चानर्थकस्स्यात् ॥१-१ १८॥

यदप्युक्त महेन्द्रप्रातिपदिकेन महत्त्वविशिष्ट इन्द्रे भिहितेपि रा जपुरुषशोभन इतिव द्विशेष्यमात्रस्यैव तद्धितार्थान्वय इति । तन्न, तथा सति गुणवाचिमहत्पदानर्थक्य प्रसगात् । नहि तस्य राजपदवदर्थ द्वारेणोपलक्षकता संभवति, देवतायास्स्वरूपेण कर्मण्य सम्बन्धात् । किंतुशब्दोच्चारण द्वारातदुपकारकत्वात् । महत्पदस्यापि तद्द्वारैवो पलक्षकता वाच्या । ततश्च तस्याप्युच्चार्यत्वात् देवतात्वं तर्गत्यवगते र्नमहत्त्वरहितस्येन्द्रस्य तद्धितार्थान्वयस्सभवति । किंच सभवति वि धेयद्र विशेषणत्वेनार्थवत्वे उपलक्षणत्वस्य स्तावकत्वस्य चान्याय्यत्वान्न

शुद्धस्यैंद्रस्य देवतात्वं । राजपुरुषश्शोभन इत्यादौतु प्रमाणांतरानुरोधेन तथांगीकरणमिति न किंचिदेतत् । अतएव च समाम्नाये "ऐंद्रं दध्य मावास्यायामैंद्रपयोमावास्यायां माहेंद्रं दध्यमावास्यायां माहेंद्रं पयोमा वास्याया"मिति व्यपदेशभेदः । अन्यथा तत्रापि महत्पदानर्थक्यम् ।

॥७॥ सू — तथा याज्यापुरोरुचोः ॥२ - १ - १९॥

तथासमाम्नाय एवैंद्र महेंद्र देवत्ययाज्यापुरोनुवाक्ययो र्भेदेनाम्नान मपींद्रमहेंद्रयो र्भेद एवावकल्पते, अन्यथा एकेनकार्यसिद्धे रितराम्नान मन र्थकं विकल्पोवा प्रसज्येत । नच भवन्मतेप्येकापूर्वसाधनत्वा दिंद्रम हेंद्रयो र्धर्मसांकर्यापत्ते र्विकल्पानिवारणम्, सम्मार्जनादिव त्प्रविनियत निर्देशेन सांकर्यानापत्ते ।

वस्तुतस्तु - मन्त्राणां लिंगेन मुख्यएवार्थे विनियोगा द्व्रीहीणां मेधसुमनस्यमान इति वदेकापूर्वसाधनीभूते प्यर्थान्तरे अप्रमाणत्वेन सांकर्यप्रसंग एव नास्ति । अतो याज्यापुरोनुवाक्ययो र्भेदाम्नानमपि देवता भेद साधकम् । सूत्रे पुरोरुक्छब्द श्शस्त्रगत मन्त्रविशेषवाच्य पि लक्षणया पुरोनुवाक्यापरो द्रष्टव्यः ।

॥८॥ सू - वशाया मर्थसंयोगात् ॥ २ - १ - २० ॥

यत्तु - वशात्व गुणविशिष्टद्रव्यविधानेपि छागशब्देन विशेष्य मात्र प्रकाशनं दृष्टमित्युक्तं, तद्वशात्वस्य स्वरूपतएवोपकारकतया रूपा द्यंतरेणापि स्मृत्यात्कर्मण्यनुष्ठानोपपत्ते र्नावश्यं शब्दोच्चारणापेक्षा । प्रकृतेतु महत्त्वस्य महत्पदोच्चारण द्वारेणैवोपकारकतया, तानुच्चरितस्य साधनत्वं संभवतीति विशेषः ।

॥९॥ सू - यत्रेतिचार्थ वत्त्वात्स्यात् ॥२ १ — २१॥

1 ननु - यत्रमाहेंद्रग्रहसन्निधावपि मैंद्रः प्रगाथः पठितः, तत्रैवास्य प्र- गीतास्याग्निपदवल्लक्षणया महत्त्वविशिष्टेंद्र प्रकाशकत्वेन निवेशकल्पनाद

र्थवत्त्वोपपत्तिः । वस्तुतस्तु नेदृशस्थले लक्षणा यागवेळायां महेंद्रपद प्रयोगेपि मंत्रविशेष्यभूतेन्द्रमात्र प्रकाशनेन मंत्रस्या पूर्वापदेवतात्वाश्रयभूतेंद्र प्रकाशनार्थत्वेनाप्युपपत्तेः; मनोतास्याग्निशब्देतु देवतावाचि मनोतापदसामानाधिकरण्येन लक्षणांगीकरणमित्युक्तं मंत्राधिकरणे । तत श्च यथापठितस्याप्युपपत्ते र्नोत्कर्षापत्तिः । अथवा पूषानुमंत्रणमंत्रवद्दुर्बल प्रमाणबाधेनोत्कर्षांगीकारेपि न क्षतिः । नच तत्र यागानुमंत्रणमंत्रसमा ख्यावदिह सम्बन्धसामान्यबो[बा]धक प्रमाणाभावेनो त्कर्षस्या प्यनुपपत्ते रानर्थक्यापत्तिः, एंद्रयागांतरे तदभावेपि ज्योतिष्टोमप्रकरणस्थैंद्रग्रहाभ्यासे प्रकरणस्यैव सामान्यसम्बन्धबो[बा]धकस्य सत्त्वेनोत्कर्षोपपत्तेः । अतश्च यत्र प्रकरण एवेंद्रयाग स्तत्रास्य प्रगाथस्यो त्कर्षे प्यर्थवत्त्वोपपत्तिरिति ।

॥१०॥ सू — नत्वाम्नातेषु ॥ २ - १ - २१ ॥

नचैंद्रस्य प्रगाथस्य प्रकरणे उत्कर्षसंभवे प्यन्येषु तत्तद्ग्रहा भ्याससन्निधा वाम्नातेषु मंत्रेषु " याम्याश्शंसति शिपिविष्टव तीश्शंसति पितृदेवत्या श्शंसति कुसुंभकसूक्तं मन्वाह अक्षि सूक्तमन्वाहमूषिकसूक्तमन्वाहे"त्यादिविधिविहितेषु प्रकरणेपि यमादीनाम भावा त्तत्रोत्कर्षानुपपत्तेः, प्रकरणबहिर्भूत यमादिदैवत्यकर्मणि च सा मान्यसम्बन्धबोधक प्रमाणाभावेनो त्कर्षानुपपत्तेः, कुसुम्भकादीनां चान्यत्रापि देवतात्वाभावेन सुतरां तदनुपपत्ते र्नार्थवत्त्वोपपत्ति रिति वाच्य,

॥११॥ सू — दृश्यते ॥२ - १ - २२॥

सर्वेषा मेवार्थवत्त्वोपपत्तिः । तथाहि - मण्डूकसूक्तस्य तावत्" मण्डूकेनाग्निंविकर्षती " ति विहितमण्डूक प्रकाशकत्वेनाग्ना वुपयोग । नच तस्या नारभ्याधीतत्वेन सामान्यसम्बन्धबोधक प्रमा णाभावः, मण्डूकसूक्तस्य प्रकरणाज्ज्योतिष्टोमसंबंधे अवगत आनर्थक्य तदंगन्यायेन तदंगभूतेचयने निवेशोपपत्तेः । एव मूषिकासूक्तस्यापि

प्रकरणाज्ज्योतिष्टोमाङ्गभूतयूपैकादशिन्यां निवेश । तत्र च यद्यप्या ग्नेयादीनां साक्षाद्विनियोग , तथाप्युपशयेयूपे " सर्वेवा अन्येयूपा पशुमन्तो अथोपशयएवा पशुरि"त्युपक्रम्य द्रव्याभावे 'आतुस्तेपशुरिति ब्रूयादि" ति मन्त्रविधानेनाखुस्मृति द्वारा लक्षणया तत्सम्बन्ध्युपशयस्तुतिरिति द्रष्टव्यम् ।

येतु याम्यादिमन्त्रास्तेषां प्रकरणे क्वचमपि निवेशासम्भवनोत्वषां योगा दन्यत्रचसामान्यसम्बन्धबोधक प्रमाणाभावेनैव तदप्रसक्तेः स्वगत्या प्रकृतप्रइदवतेव लक्षणयैवते प्रकाश्यते । प्रयोगाभावेन निषिद्धल क्षणानङ्गीकारेतु जपादिमन्त्रवद्याम्यादिमन्त्राणा मप्यदृष्टार्थ मुच्चारणं प्रकृतग्रह पागाङ्गत्वेन वीधीयते । अस्मिन्श्च पक्षे स्मैनिशसन्दो गुणवि शेष्यक प्रकाशनलक्षकत्वाभावेपि लक्षणयोच्चारणपरत्व मेव द्रष्टव्यम् । यदि स्वस्मिन् पक्ष ऽ दृष्टार्थत्वस्या वश्यकत्वे लक्षणाङ्गीकारे प्रमाणाभाव श्शक्यत, ततो याम्यादिविषये गुणविशेष्यक गुणिसम्बन्धकीर्तनात्मक स्तोत्र शस्त्रविधान मेवा दृष्टार्थ मङ्गीक्रियते । नचैतावता सर्वत्रैव तथा प्रसङ्ग , अनुपपत्तेरभावात् । नच याम्यादिमन्त्रेषु तत्तन्मान्त्रव र्णिक देवताङ्गीकारेण तद्देवत्ययागान्तरस्यैव कल्पयितु शक्यत्वात् किमिति सिद्धान्त्यभिमत स्तोत्रशस्त्रादृष्टार्थताङ्गीकरणमिति वाच्यम् , याम्यादि मन्त्रे स्स्तुतिभागित्वरूप देवतात्व कल्पनेप्ययागत्वद्रव्य सम्बन्धाभावे हविर्भागित्वरूप देवतात्वाकल्पनात् तदेकत्रस्य यागानुमानानुपपत्ते । अतएव जपादिमन्त्रेषु न यागान्तरकल्पनम् । किन्त्वदृष्टार्थत्वमेव । नचान्येषु जपादिमन्त्रेष्व दृष्टार्थत्वेप्यत्र ' यज्ञस्य साधनताव्यापद्येत अता देवाअवतुन इतिजपत अपिवान्यांवैष्णर्वामि " त्यादौ विष्णु प्रकाशकस्य मन्त्रस्यापांशुयागाङ्गत्वन विहिताश्च विहितकर्मणि मान्त्रवर्णिक देवताकल्पकत्वेनोपपत्ते किमित्यदृष्टार्थत्वाङ्गीकरणमिति वाच्य, विधिवाक्यादेवैतस्य मन्त्रस्य यज्ञसाधन लोपनिमित्त वैगुण्यसमा धानार्थत्वे नावगतत्वादर्थान्तराकाङ्क्षानुपपत्ते । अतोजपादि मन्त्रवदेवया म्यादिमन्त्राणाम दृष्टार्थत्वसिद्धान्ताभिमत स्तुतरूपत्वमेवाङ्गीकर्तव्यम् ।

यत्तु- मूले "वाचस्तोमे सर्वा ऋचस्सर्वाणि यजूंषि सर्वाणि सामानि पारिप्लवं शंसती"ति विहिते शंसे सर्वेषां मन्त्राणां विनियोगाद्याम्यादीनामपि तत्रैवोत्कर्षः । यद्यपि च तत्र दृष्टविधानोपयोगः, तथाप्य दृष्टद्वारैव तदुपपत्ति" रित्युक्तं । तद्वाचस्तोमस्य दृष्टार्थतावश्यकत्वे याम्यादीनामपि सान्निध्याबाधार्थं प्रकृतग्रहएव अदृष्टार्थत्वस्य न्याय्यत्वादुपेक्षितम् । यदितु वचनेन सान्निध्यबाधान्न प्रकृतग्रहसंबन्ध इत्याशक्येत, ततो दर्शपूर्णमास प्रकरणपठितानां जपादिमन्त्राणामन्येषां च लिंगादिविनियुक्तानां वचनेन लिंगादिबाधापत्तेर्न तदंगत्वसंभवः । अथतु वाक्यस्यापि सामान्यविषयस्य विशेषनिष्ठलिंगादि बाधकत्वायोग उच्येत, ततस्सन्निधावपितुल्यम् । तस्मात्पूर्वोक्त विधयैवार्थवत्त्वदर्शन व्याख्येयम् ।

॥१३॥सू – अपिवाश्रुतिसंयोगात्प्रकरणे स्तौतिशंसती क्रियोत्पत्तिं विदध्याताम् ॥२ - १ - १४॥

नैन्द्रस्य प्रगाथस्योत्कर्षस्संभवो । सन्निहितावत्प्राकरणिक एवैन्द्र यागे, तस्यावान्तराधिकारविहित मन्त्रांतरावरोधेन तत्रास्य मन्त्रस्यानवकाशात् । नापि क्रतुप्रकरणबहिर्भूते इंद्रयागांतरे, तत्र सामान्य संबन्धबोधक प्रमाणाभावेनोत्कर्षानुपपत्तेः । इन्द्रशब्देन मनोतास्थाग्निशब्दस्येव महेन्द्र प्रतिपादनन्तु लक्षणाभियात्वयैव निरस्तम् । अथाशिष्यते तावद्यागवेलायां विशेषणयुक्त प्रकाशनेपि मंत्रे विशेष्यमात्र प्रकाशन नानुपपन्नमिति, तत्रेदंवाच्यं, स्तौतिशंसत्योर्गुणि प्रकारक गुण विशेष्यकबोधानुकूल व्यापारवाचित्वस्य गुणिनिष्ठ गुणतात्पर्यक बोधानुकूल व्यापारवाचित्वस्य वा वक्रकेशान्तो देवदत्त इत्यादावविवावधारणात्, गुणिप्रकाशनार्थत्वे लक्षणापत्तेस्स्तौतिशंसति वाच्यस्यैवार्थस्य विधेयत्वावगमात्तस्य च दृष्टार्थत्वासंभवे अदृष्टार्थत्वकल्पनस्य फलमुखत्वेन प्रामाणिकत्वात् नानुपपत्तिरिति । लोके वक्रकेशो देवदत्त इत्यत्र देवदत्ते वक्रकेशप्रतिपादनएव स्तुति बुद्धिरुत्पद्यते, न पुनर्वक्रकेश

त्वस्य देवदत्तविशेष्यता प्रतिपादने । तेन स्तौतिशक्तिः पदशक्ति पर्यालोचनया प्रकाशनार्थत्वावगमाद् दृष्टार्थत्वांगीकारेणापि गुण प्रकारक गुणिविशेष्यक शाब्द बोधानुकूल व्यापाररूपस्तुति विधायि त्वमेव युक्तम् । नच प्रयाजशेषेणेतिवत् दृष्टार्थत्वानुरोधेन लक्षणां गीकरणमप्यदोष, प्रकाशनस्य लिङ्गकल्प्यश्रुतिवलेनैव प्राप्तिसम्भवे लक्षणयैव तत्प्रतिपादनेपि विधिवैयर्थ्यात् । किंच दृष्टार्थत्वं किंत्वया मन्त्राणामभ्युपगम्यते, स्तुतेर्वा ? नाद्य, ममापि स्तुतिनिष्पादकत्वेन तत्स त्वात् । नान्त्य, स्तुतिस्वरूपस्यैवहानापत्ते । तस्माद्धातु श्रुतिसंयोगात्प्रक रण एवस्तौतिशक्तिः स्तुतिरूप क्रियोत्पत्तिं विदध्यातामिति सूत्रार्थं ।

॥१३॥ सू — शब्दपृथक्त्वाच्च ॥ २ - १ - १५ ॥

'द्वादशस्तोत्रोग्निष्टोमो द्वादश शस्त्रोग्निष्टोम" इति श्रुत द्वाद शत्वं न प्रकाशनलक्षणायांमेवकल्पते प्रकाशमाना प्रत्यृच प्रतिपद् र्थाभिन्नत्वेन द्वादशत्वानुपपत्ते । प्रकाशनत्वेनैक्यांगीकारे सुतरां तदनुपपत्तेश्च । अस्मन्मतेतु सत्यपि प्रत्यृच स्तुतिव्यक्तीना भेदे विधि भेदेन विधेयतत्तदनेकस्तुतिव्यक्ति वृत्तिविधेयतावच्छेदकीभूते वैजात्या वश्यभावा तज्जातिगत द्वादशत्वोपपत्ति । नचतु प्रकाशनस्य सामर्थ्य प्राप्तत्वेना विधेयत्वा न्नवैजात्यकल्पने प्रमाणमस्ति ।

किंचास्मन्मते वैजात्याकल्पनेपि तत्तद्विधिभेदेन विधेयभावना भाव्यस्या नेकस्तुतिजन्या पूर्वस्य भेदावश्यभावा तद्गतद्वादशत्वेनापि स्तोत्रादि द्वादशत्वोपपत्ति । प्रकाशन पक्षेतु तस्य दृष्टार्थत्वेना पूर्वा नंगीकारात् दृष्टप्रयोजनस्यस्य च प्रत्यक्षबाधितत्वेन द्वादशत्वानुपपत्ति । अतोद्वादशशब्देन स्तोत्राणां शस्त्राणां च पृथक्त्वाक्षेपादपि न प्रका शनलक्षणा ।

॥१४॥ सू — अनर्थकंच तद्वचनम् ॥२ १ १६॥

प्रकाशनार्थत्वपक्षे अग्निष्टुति "आग्नेया ग्रहा भवन्ती"ति वचनेन प्राकृतग्रहानुवादेनाग्निदेवताविधौ कृते प्राकृतदेवताबाधेव त्प्रकाशक मन्त्रबाधेनाग्निप्रकाशकमन्त्रांतराणां न्यायादेव प्राप्ते आग्नेयीषु स्तुव तइति वचनवैयर्थ्यापत्तिः । नचास्य प्राकृतमन्त्रेष्वग्निपदोहप्रसक्तौ मन्त्रान्तरविधानेनार्थवत्त्वमिति वाच्यम्, "पूयतिवाय एतद्वचाक्षरं यदेनमूहयति तस्मादृचंनोहेदि" ति ऋगूहनिषेधा दर्थप्रकाशनरूपकार्यवशे नाग्नेयमन्त्रान्तरस्यैव प्राप्तिः । अस्मन्मतेतु सत्यपि ग्रहाणामाग्नेयत्वे कर्मासमवेतगुणिनिष्ठस्यापि गुणस्यकीर्तनेन स्तोत्र शस्त्रजन्यादृष्टसंपत्त्युपपत्ते प्राकृतानामिव मंत्राणा मुच्चारणे प्रसक्ते तन्निवृत्त्यर्थमाग्नेयीषु स्तुवत इति सार्थकम् ।

॥१५॥ सू – अयथार्थं प्रतीयते ॥ २ । १ । २७ ॥

सम्बद्धे स्तोत्र शस्त्रेति श्रुत्या स्तोत्रशस्त्रयो स्सबन्ध प्रतीते स्सबंधस्यच भेदसाधनत्वा त्स्तोत्र शस्त्रयो स्स्वरूपत. फलतोभेदे वैजात्य कल्पनया भेदोवधार्यते । नचासौ प्रकाशनार्थत्वपक्षेसंभवति । नच स्तोत्रादावपि प्रगाणा प्रगाणकृत संभवत्येवेतिवाच्य, स्वरूपत फलतोवा भेदासंभवे प्रगाणादिप्रयोग कृतभेदस्या न्याय्यत्वात् ।

॥१६॥ सू – अभिधानचकर्मवत् ॥ २ - १ २८॥

यदिदं स्तोत्रशस्त्रादिरूपं सामान्याभिधानं यच्चाज्यप्रौगादिरूपं विशेषाभिधानं तदुभयं मप्यारादुपकारकत्वपक्षे उपपद्यते, नतु संस्कारकर्मत्वपक्षे, संस्कारस्य संस्कार्यनिरूपणाधीन निरूपणीयस्य संस्कार्येणैवावच्छेदसिद्धौ अवच्छेदकभूतसंज्ञानपेक्षत्वात् । एवं सत्यपि यद्यारादुपकारकत्वग्राहकं स्तौति शंसति धातुरूपं श्रौतप्रयोगं स्संस्कारकर्मबाधकोनस्या, तर्ह्यलिंगेन संस्कारकर्मत्वस्यैवावधारणात् "अंशुंगृह्णातदाभ्यं गृह्णाती" ति वदगत्यासत्यप्यवच्छेदकांतरे संज्ञावच्छिन्नमेव ज्ञातं कृतं धर्माभ्युदयकारिभवतीति कल्पनया संज्ञाप्रणीतेति नात्र तदस्तीत्यत आरादुपकारकत्वमेव युक्तमुत्पश्याम ।

॥१७॥ सू – फलनिर्वृत्तिश्च ॥२ । १ । १९॥

' स्तुतस्य स्तुतमस्यूर्जस्वत्पयस्वत् आगमास्तोत्रस्य स्तोत्र गम्या दिन्द्रियावन्तावनामहे धुक्षीमहि प्रजामिष सा मे सत्याशीर्देवेषु भूयादि " ति मन्त्रे भावनिष्ठातेन स्तुतपदेन स्तोत्रक्रियोपादानात्, स्तोत्रस्य मध्ये स्तोत्रमस्ति तदेव भूत स्तोत्रस्योर्जस्वत्पयस्वद्रूपया मामगम्यात्, इद मत इन्द्रोपलक्षित देवतावन्तो वय रयीं पाथामहे प्रजामिष प्रजामहे इति चेय यद्वदुपलक्षितस्य स्तोत्रस्य। शीःस्तुत्या भूयादित्यर्थकेन स्तोत्रा देव फल प्रार्थित न देवताया । यद्यपि च नेद स्तोत्रस्यफल करणविभक्ति सयोगाभावेन। यागतत्त्वगभावस्य स्तोत्रस्य मोक्षवर्जित फलकल्पनानुपपत्तेः; तथापि प्रधानफलमेव परम्परासम्बन्धेन स्तोत्रा प्रार्थितलक्षणया स्तोत्रफलमेव प्रत्युपचारात्पयम्। अतश्च स्तोत्रक्रि यात फलप्रार्थनात्ताभ्या एव प्राधान्यम्, न देवताया । इतरथाहि देवतात्पयफल प्रार्थ्येत प्रधानत्वात्, नागभूतारम्भकाशनात्। किं च प्रधानस्य दृष्टफलत्वेन तत्फलस्य प्राप्तुगम्यत्वाच्च प्रार्थनादाय, स्तोत्रफलस्याथ दृष्टत्वादद्दारमिति विशेष । अत आरादुपकारकाण्येव स्तोत्रशस्त्राणीति सिद्धम् ।

प्रयोजन प्राकृत महानुवादेन विकृतौ देवतान्तरविधाने आग्नेयीषु स्तुवतइत्यपयोग्यपदवनाभावे प्राकृतानां मन्त्राणामविकारेण प्रयोग सिद्धान्ते, पूर्वपक्षे प्राकृतमन्त्रबाधेन वैकृतदैवात्य मन्त्रागम इति दशमे वक्ष्यते।

इति स्तोत्रादिप्राधान्याधिकरणम् ॥५॥

अथ मन्त्राविधायकत्वाधिकरणम्।

॥१॥ पू – विधिर्वा संयोगान्तरात् ॥२—१—३४॥

"भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयतैषह्यर्थोविधीयते " इत्यनेनोपक्षिप्तानां विधायकाख्यातानां "तन्निर्द्देश" मित्यादिना द्वैविध्यमुक्त्वा इदानीं प्रसङ्गादाख्यातस्यापि क्वचिद्विधायकत्व नास्तीति प्रतिपाद्यत ।

' नतानशातिनदभाति तस्करोनासामामित्रो व्यधिरादधर्षति । ज्योगित्ताभिस्सचत गोपति स्सह देवाश्च याभिर्यजतेददाति च " इत्यादिमन्त्रे ' यस्योभयं हविरार्तिमार्छे " दित्यादौ ब्राह्मणेच येयच्छब्दादिसमभिव्याहृता आख्यातशब्दा स्ते किं विधायका उतनेतिसंशय । अत्राप्य पूर्वभेदोपयोगिनएव विचार्यमाणत्वा त्पादाध्यायसङ्गतिस्पष्टे । प्रासङ्गिकीप्यनन्तरा ।

तत्रार्छेदित्यादौ असन्दिग्धलिङ्श्रवणा यजतेददाति चेत्यादावपि स्तुत्युन्नीत लडन्तत्वावधारणा यजेतस्वर्गकामइतिवदेव विधायकत्वाविध्यत' । नच यच्छब्दादिना प्रतिबध यच्छब्देन गोपदार्थस्य सिद्धत्वद्योतनेपि " यदाग्नेयोष्टाकपाल " इतिव यागसाधनत्वेन विध्युपपत्ते । अतएव कर्तृसमानाधिकरणस्य यच्छब्दस्यैव प्रतिबधकता न कर्मसमानाधिकरणस्येति सिद्धान्तिनोपि प्रवाद' ।

वस्तुतस्तु गुणभूतेन यच्छब्दादिना प्रधानभूतविधिशक्ति प्रतिबधस्यान्याय्यत्वा त्कर्तृसमानाधिकरणे यच्छब्देसत्यपि न विधिव्याघात । किं च यच्छब्दादिक प्राप्तिद्योतक त्प्रतिबधक वाच्यम् । सापश्चिमाप्ति. प्रमाणान्तरेणास्ति चदातेनैव प्रतिबधसिद्धेः कृतयच्छब्दादिना । यदिनास्ति तदा यच्छब्दसद्भावेपि यएव ग्नि द्वानग्निचिनुत " इतिव दप्राप्तार्थकत्वादेव विध्युपपत्ते र्नयच्छब्दादेः प्रतिबधकतासभवति ।

वस्तुतस्तु एतस्य मन्त्रस्य गोद्रव्यकानूबन्ध्य पशुपुरोडाशानुनिर्वाप्य दैविकहविर्योगे चरुद्रव्यके गोदैवत्ये याज्यात्वेन विनियुक्तत्वात्तद

यद्द्रव्यकत्वा द्गोद्रव्यकत्वाभावेन तत्रातिनियुक्तस्याप्यस्या प्राप्तस्वतन्त्रगो द्रव्यक यागविधायकत्वोपपत्ति । नच साक्षाच्छेषिणि देवता द्विनियोगगो द्रव्यकत्वाभावेऽपि तच्छेषिण्या मनुष्यस्यापि गोद्रव्यकत्वस्य प्राप्तत्वाद् विधायकत्वोपपत्तिरिति वाच्यम् , एवं यथाकथंचित् प्राप्तिसम्भवे प्रभ्या सात्मर्थं तत्त्वोपपत्ते । अतश्च यजेत स्वर्गकाम इत्याख्यातस्य मन्त्रगत स्याप्याख्यातस्य विधिरूपैव प्रयोजनकत्वमेव, विधायक शब्दत्वस्याभ यत्र समाम्नायादिति सूत्रार्थः ।

अत्र च मन्त्रग्रहणं यच्छब्दादि समभिव्याहृताख्यात मात्रोप लक्षणम्, न तु स्वतन्त्रम्, "वसन्ताय कपिञ्जलानालभेत" इत्यादावभि युक्तप्रसिद्ध्या मन्त्रत्वेऽपि विधायकत्वाङ्गीकारात् । यस्योभयमित्यादौ च ब्राह्मणे यच्छब्दादिसमभिव्याहारे तदनङ्गीकाराच्च । अतश्च सर्वस्याप्य स्योदाहरणत्वेऽपि प्रायशो यच्छब्दादि समभिव्याहारस्य तेष्वेव सत्त्वात्सूत्र मन्त्रग्रहणम् ।

सिद्धान्तमाह-

॥३॥सू — अविरा प्रयोग सामर्थ्यात् मन्त्रोभिधानवाची स्यात् ॥२ १ ३४॥

नैते विधायका यजते' इत्यादौ भाव्याद्युल्लेख साधारणत्वेन विध्यर्थक त्वा निश्चयात् । न च स्तुत्यर्थतानिश्चय विधेरभावे स्तुतेरेवा निश्चयेन तस्या अतन्निश्चायकत्वात् । न च "वसन्ताय कपिञ्जलानालभेत" इत्यादि प्रामाण्यं तथैव तन्निश्चायकं, गोद्रव्यकस्य यागदानादेरनुवादादि रूपस्य तदन्यस्यापि बहुश प्रायश्येन तदसिद्धेः । अतएव न विधि पुनश्च वणरूपाद्भ्यासारम्भान्तरस्य शक्य विधित्वस्यैवा निश्चयेनाभ्यासस्वरूपा भावात् । विध्यभावेऽपि पुनःश्रुतिमात्राद्भेदस्तु पुनःश्रुतेः स्मरणार्थत्वेनाप्युप पत्तेरनन्यपरत्वाभावादयुक्त । किञ्च यद्यप्यत्र विधायका लिङादिरश्रोऽप्यस्ति तथापि यच्छब्दादिना विधिशक्तिप्रतिबन्धा द्वास्य विधायकत्वोपपत्ति । तथाहि - यच्छब्द स्ताधारत्वसमभिव्याहृतार्थस्य सिद्धतां द्योतयन् प्रासि

मपेक्षते । अस्ति चात्र सा । अतो गोद्रव्यकयागदानादेरनूद्यमानस्या ज्ञात ज्ञापनैक स्वभावविधिविषयत्वायोग स्स्पष्ट एव । नच यच्छब्दस्य स्वार्थमात्रे सिद्धताद्योतकत्वा द्रोस्वरूपानुवादेऽपि तस्य साधनत्वेनविध्यु पपत्ति रितिवाच्यम्, यः पाकं करोति स भुङ्क्त इत्यादौ यत्तच्छब्दयो स्स्वसमभिव्याहृतमात्रे सिद्धत्वद्योतकताव्युत्पत्तेः । अतश्च याभिर्यजते याश्च गा ददाति ताननश्यंति, नच तस्करो दभ्नोति, नचएनाः आमित्रोव्य थिरादधर्षति व्यथया अभिभवति, गोस्वामी च ताभिस्सह चिरं प्रवर्तते इति यच्छब्देन समभिव्याहृते गोद्रव्यकयागदानादावपि सिद्धताप्रतीते न विधेयतोपपत्तिः । यच्छब्दस्य समभिव्याहृतवृत्ति सिद्धताद्योतकत्वा देव च यत्र कर्तृसमभिव्याहारस्तत्र कृत्याश्रयत्वरूपकर्तृत्वस्य सिद्धता प्रतीतौ कृतेरपि तत्प्रतीते र्विधेयत्वानुपपत्त्या विधिशक्त्यनुपपत्तिः । यत्र तु कर्ममात्रसमभिव्याहृतो यच्छब्द स्तच्छब्दसमभिव्याहृतश्च विधि स्तत्र सत्यपि कर्मस्वरूपस्यानुवादे कर्तव्यत्वेन विधानोपपत्तेः न विधिशक्तिः प्रतिबन्धकता यच्छब्दस्य । प्रकृते तु विधेर्यच्छब्देनैव स मभिव्याहारादुक्ता प्रतिबन्धकतेति विशेषः । एवं सत्यपि यदि कथं चिद्प्याख्योच्यमाने प्राप्तिर्नसंभाव्येत ततो यदाग्नेयोऽष्टाकपाल इति यथ च्छब्दस्य स्वार्थमात्रसिद्धत्वद्योतकता मङ्गीकृत्य विधे र्विधायकत्वोपपत्ते र्नशक्तिः प्रतिबद्धयेत । नात्वेतदस्ति, गोद्रव्यकस्य यागदानादेर्बहुशः प्राप्तत्वात् ।

यत्तु- सत्यपि यच्छब्दस्य विधिविरोधित्वे प्रधानभूताया द्विध्य नुग्रह एव न्याय्य., न गुणभूतयच्छब्दानुग्रह, इत्युक्तम् । तदुच्चैरृचा क्रियत इत्यादौ प्रधानभूतस्या प्युपसंहारस्थस्य विधेः रुपक्रमस्थेन गुणभू तेनाप्यर्थवादेन बाधस्य वक्ष्यमाणत्वा दाकिंचित्करम् ।

वस्तुतस्तु- विधिवदेव यच्छब्दस्यापि प्रधानभूत भावनान्वयित्वा द्याविधि प्रतीतस्य गुणत्वम् । यदि परं पदांतरत्वा त्तदपेक्षया विप्र कर्षं शंक्येत, ततः " ऐन्द्रपञ्चशराव " मित्यनेन वाक्यभेदापत्त हेतुहेतुम तोरित्यनुशासन वैयर्थ्यापत्तेश्च विधिशक्तिप्रतिबन्धोऽनुसन्धेयः ।

न्यूह प्रवरनामधेयानि किं मन्त्रा उत नेति विचारः। केचित्तु मन्त्रब्राह्मणात्मकवेदस्य द्वैरूप्ये निरूपिते प्रसंगात्प्रत्यक्षपठितएव वेदे द्वैराश्यं नत्वनुमित इति वक्तुमूहादीनां द्वैराश्यबहिर्भावेन प्रतिपाद्यत इत्याहुः। तेषामनाम्नातेष्वमन्त्रत्वमितिवद् ब्राह्मणत्वमित्यपि सूत्रापत्तेः उपेक्षैवयुक्ता।

तत्रप्रयोगकाले अर्थाभिधायकस्यैव मन्त्रपदवाच्यत्वादूहादीनां चार्थाभिधायकत्वस्य स्पष्टत्वात् मन्त्रपदैकवाक्यत्वाच्चैषां मन्त्रत्वम्। अन्यथा ह्य मन्त्रैकवाक्यतापन्नानां मन्त्राक्षराणामपि श्लोकैकवाक्यतापन्न मन्त्राक्षरवदमन्त्रत्वापत्तिः। ऊहे तु मन्त्रान्तर्गताग्निपदत्यागादप्यवशिष्टाक्षरेषु सा। अस्मन्मते तु मन्त्रभूताग्नि पदयुक्तानामिव मन्त्रभूतसूर्यादि पदयुक्तानामपि मन्त्रत्वोपपत्तेर्नायंदोष। तस्मादूहादीनामपि मन्त्रत्वमिति प्राप्तेऽभिधीयते —

प्रयुक्तसूत्रव्युत्पादिता व्याप्त्यादिदूषणवशेनैतल्लक्षणायोगस्य स्पष्टत्वादभियुक्तप्रसिद्धिविषयत्वस्यैव तल्लक्षणत्वं वाच्यम्। अतश्चोहादीनां तदभावेन मन्त्रत्वायोगस्स्पष्ट एव। नचैतावता तदेकवाक्यतापन्नमन्त्राक्षराणाममन्त्रत्वापत्तिः, मन्त्रत्वप्रत्यभिज्ञानस्य दृढत्वात्। अतएव कर्मकालेऽध्यापने प्लुतिकरणेऽपि न मन्त्रत्वहानिः। यत्र तु श्लोकाद्येकवाक्यतापन्न द्विमन्त्राक्षरेषु न मन्त्रत्वप्रसिद्धिरभियुक्तानां तत्र मन्त्रत्वे प्रमाणाभाव स्स्पष्ट एव। अतश्चोहादिष्वभियुक्तप्रसिद्ध्यभावेन अमन्त्रत्वेऽपि तदेकवाक्यतापन्नानामक्षरान्तराणां तत्सत्त्वात् मन्त्रत्वोपपत्तिः। एवञ्चैवं कृणोत्विन्द्रमित्यादौ इरापदस्य मन्त्रत्वप्रसिद्ध्यभावेनामन्त्रत्वेऽपि तदेकवाक्यतापन्नाक्षरान्तराणां मन्त्रत्वोपपत्तिः। इरापदे मन्त्रत्वप्रसिद्धिस्तु अध्ययनकाले पारायणादौ चोपयुज्यत इति द्रष्टव्यम्।

यत्तु वार्तिके इरापदस्य ऐरमिति विधिवाक्ये सङ्गितान्तर्गतत्वे नाम्नातत्वादरत्येव मन्त्रत्वमित्युक्तं, तद्ब्राह्मणे समाम्नातस्यापि मन्त्रप्रसिद्ध्यविषयत्वेन मन्त्रत्वायोगात् वसन्ताय कपिञ्जलानालभेतेत्यादिवदमन्त्रत्वम्। ऊहपाठाभ्युपगमेऽपि ऐरपदस्यैव पठितत्वेन मन्त्रत्वापत्ते स्तद्विधेयस्येरापदस्य वस्तुतः पाठाभावेन मन्त्रत्वानुपपत्ते रतिशयापर्यमिति द्रष्टव्यं।

एवं यत्रापि सूक्तवाकादौ "आशास्तेऽयं यजमानोऽसा"विति सर्वनामसंयुक्त मन्त्राम्नानं तत्राप्यसावित्यस्य स्वाध्यायकाले मन्त्रस्यापि कर्मकाले त त्स्थाने पठनीयस्य देवदत्तादिपदस्य स्वरूपेणा पाठादभियुक्तप्रसि द्धिविषयत्वानुपपत्तेरमन्त्रत्वम् । नच सर्वनाम्नि मन्त्रताप्रसिद्धेस्तत्स्थान पन्ने तदनुमेय देवदत्तादिपदविषयत्वकल्पनया मन्त्रत्वोपपत्तिरिति वाच्यं, सर्वनाम्न्यपि मन्त्रत्वप्रसिद्धेः स्वाध्यायोपयुक्तत्वात् । अतोऽत्रापि देवदत्ता दिपदे मन्त्रत्वोक्तिरतिशयार्थैव वार्तिके द्रष्टव्या । तस्मादभियुक्तप्रसिद्धच विषयत्वाद्युक्तमूहादीनाममन्त्रत्व । प्रयोजनं पूर्वपक्षे ऊहादिभ्रेषे मन्त्रभ्रेषनिमित्तं प्रायश्चित्त । सिद्धान्ते त्वमन्त्रभ्रेष निमित्तकमेव । मन्त्रत्वनिमि त्तकशब्दविकारादिसद्भावश्च । सूत्रं स्पष्टम् ।

इति ऊहाद्यमन्त्रताधिकरणम् ॥९॥

अथ ऋग्लक्षणाधिकरणम् ।

॥१॥ सू - तेषामृग्यत्रार्थवशेन पादव्यवस्था ॥२-१ ३५॥

एवं लक्षणाद्यधिकरणेन मन्त्रपदे स्थिते इदानीं प्रसङ्गात्तदवान्तर भेदरूपस्य ऋगादेः "अहे बुध्निय मन्त्रं मे गोपाय" इति वेदत्रय ऋगादित्रयाव धानार्थं लक्षणमुच्यते । तेषां मन्त्राणां मध्ये यत्र पादव्यवस्था त्रिपदा गायत्री चतुष्पदानुष्टुबित्यादिका सा ऋक् । अथवाऽनियताक्षरे पादसमाप्ति नास्तीति पादव्यवस्थाप्रसक्तेः, नियताक्षरे तावत्तावत्स्वक्षरेष्वेव तद प्रयोगात् । सा च पादसमाप्तिः क्वचिदर्थवशेन । यथा अग्निमीळे पुरोहित मित्यत्र । नचात्र ऋगर्थपर्यवसानाभावात् कथमर्थवशेन पादसमाप्तिः ? ऋगर्थपर्यवसानेऽपि ईळेपदार्थान्तर्भावात् पदार्थापर्यवसानाभावात् । एव मध्यपदयोरपि पादयो रेतदाकाङ्क्षानुयोगिनैरर्थक्यमात्र द्रष्टव्यं । अतो

युक्तार्थवशेन पादव्यवस्था । क्वचिच्च "अग्निःपूर्वेभिर्ऋषिभि" रित्यादौ लघुगुर्वक्षरसाम्यात्मकवृत्तवशेन, "अभिमीळ" इत्यादौ चाक्षरसंख्यानियमलक्षणछन्दोवशेन, "समुद्रा मिन्द्रंनरेजमान" मित्यादौ चाल्पवैषम्येणैव, पादव्यवस्था । अतएव सूत्रे अर्थवशग्रहणं वृत्तवशादेरुपलक्षणार्थं । तदपिच न लक्षणान्तर्गतं, पादव्यवस्थावन्मन्त्रस्य रूपस्यैव लक्षणस्यानतिप्रसक्तत्वात् ।

इति ऋग्लक्षणाधिकरणम् ॥ १० ॥

अथ सामलक्षणाधिकरणम् ।

॥१॥ सू - गीतिषुसामाख्या ॥ २-१-३९ ॥

अत्र तेषामित्यनुवृत्य मन्त्रगतगीतित्वस्य सामशब्दार्थता लभ्यते । अतश्च नलौकिकगीतावतिप्रसंगः । अभियुक्तव्यवहाराच्चास्यापि शब्दार्थस्यावधारणं । नचैव वैदिकगीतिविशिष्टमन्त्रेऽभियुक्तप्रयोगात् मन्त्रस्यापि वाच्यतापत्तिः, मन्त्राणां व्यक्तिन्यायेन लक्षणयापि भानोपपत्तौ अतिरिक्तशक्तिकल्पने प्रमाणाभावात् । विस्तरेणचैतत्सप्तमे उपपादयिष्यामः । नचैवं पौनरुक्त्यम्, सामशब्दस्य गीतिमात्रवाचित्वे तद्विशिष्टमन्त्रवाचित्वे वा उभयथा ऋग्यजुर्भ्यां विवेकोपपत्तेः गीतिमात्रवाचित्वस्य इहानुपयोगेन अवाच्यत्वात् सप्तमएव ऋगन्तरे अतिदेशसिद्ध्यर्थं अवश्यवाच्यत्वात् । इह सप्तमसिद्धस्यैव गीतिमात्रवाचित्वस्य अनागतावेक्षणेन शिष्यहितार्थं कथनेन पौनरुक्त्यानापत्तेः । यथाच तस्य नाक्याधिकरणेन पौनरुक्त्यं तथा सप्तमएव उपपादयिष्यामः ।

यत्तु नवमे पुनर्गीतिमात्रवाचित्वकथनं तदुत्तरविवक्षार्थं स्मरणार्थमिति तत्रैव वक्ष्यते ।

इति सामलक्षणाधिकरणम् ॥११॥

अथ यजुर्लक्षणाधिकरणम् ।

॥१॥ सू - शेषे यजुश्शब्दः ॥ २-१-३० ॥

ऋक्सामभिन्नं यदश्लिष्टाक्षरमन्त्रजातं तद्यजुः । स्तोभाक्षराणामपि यजुष्ट्वान्नातिव्याप्तिः ।

इति यजुर्लक्षणाधिकरणम् ॥ १२ ॥

अथ निगदानांयजुष्ट्वाधिकरणम् ।

॥१॥ सू - निगदो वा चतुर्थं स्याद्धर्मविशेषात् ॥ २-१-३१ ॥

शेषे यजुश्शब्द इत्येतदाक्षेपेणेदमारभ्यते । सन्ति निगदा नाम परसंबोधनार्था मन्त्राः अग्नीदग्नीन्विहरेत्यादयः । ते किं यजूंष्येव, उतभिन्ना इति विचारः । तत्र निगदानां यजुष्ट्वे "उपांशु यजुषे"ति वचनेनोपांशुत्वप्राप्तेः " उच्चै र्निगदेने " ति वाक्यविहितोच्चैस्त्वानुपपत्तिः । नच विशेषविहितेन सामान्यविहितस्य बाधः, विशेषविधेः स्वविषयप्रवृत्तिभेद बोधनेनाप्युपपत्तौ सामान्यस्यापि वाक्यस्य संकोचप्रमाणाभावात् । नच परसंबोधनरूपकार्यानुरोधेनोपांशुत्वविधेः संकोचादुच्चैर्निगदेनापि स्यात्तु

चाद्बत्वोपपत्तेर्न भेदबोधकतेति वाच्यम्, मन्त्रगतलिङ्गप्रमाणकस्य प्रया-
जनरूपकार्यानुरोधेन वाक्यस्यापि ब्राह्मणगतस्य सङ्कोचायोगात् । "नमः
प्रवक्त्रे" "देवेद्धा मन्विद्ध" इत्यादिना परसम्बोधनार्थत्वस्याप्यभावाच्च । सत्य-
पि परसम्बोधनार्थत्वे उपांशुत्वव्यतिरिक्तमन्त्रादिस्वराणामपि पक्षे
प्राप्तत्वादुच्चैस्त्वानुवादानुपपत्तेश्च । अतश्चोच्चैर्निगदेनोपस्य विधित्वासम्भ-
वाद्भेदबोधनादपि च तदुपपत्तेर्न सामान्यस्यापि वाक्यस्य सङ्कोचक-
ल्पनावसरः । तस्मादर्थान्तरं निगदाः । सूत्रस्पष्टम् ।

॥ १ ॥ सू – व्यपदेशाच्च ॥ २-१-४१॥

इमं निगदा, इमानि यजूंषीति सञ्ज्ञाभेदादपि ज्योतिरादिवद्भेदकतोप-
पत्तेरर्थान्तरम् । एवञ्च 'मन्त्र एवायं निगदभूतो भवति तस्माद्यजु'' रिति
सुब्रह्मण्यावाक्यशेषे निगदस्य यजुष्ट्वसङ्कीर्तनयोगेन यागसाधनत्वमात्र-
परम्, सुब्रह्मण्यमात्रस्यैव वा यजुष्ट्वज्ञापकमिति द्रष्टव्यम् ।

॥३॥ सू – यजुःस्थाने तद्रूपत्वात् ॥ २-१-४२ ॥

नैतदेवम्, "अद्भ्युर्मिषे" ति मन्त्रे मन्त्राधान्तरभेदानां गुणादिमन्त्राणां
ब्रयाणामेवानुकीर्तनेन निगदस्य भेदेनानुकीर्तनात्, मन्त्र एष स्वयं
निगदभूतो भवतीत्यत्र ऋक्सामभिन्नमन्त्रत्वस्य सुब्रह्मण्यानिगदे यजुष्ट्व-
साधकत्वेनोक्तस्य निगदान्तरेष्वपि सत्त्वाच्च । न चायं यौगिको यजु-
श्शब्दः, जपादिसाधनमन्त्रेऽपि प्रश्लिष्टपठिते यजुश्शब्दप्रयोगेण तस्य रू-
ढ्यापगमात् यौगिकार्थबोधकत्वानुपपत्तेः । तस्माद्यजूरूपमप्यभिहाना
यजुष्ट्वमेव । यत्तु विरुद्धधर्मकत्वाद्भेद इति तत्रोत्तरम् –

॥४॥ सू - वचनाद्धर्मविशेषः ॥२ १ ४३॥

'वेदो वा प्रायदर्शनादि'' त्यत्र तृतीये वेदोपक्रमानुरोधेनोच्चैस्त्वादेः
ऋग्वेदादि विहितकर्माङ्गमन्त्रमात्राङ्गत्वस्य स्थापयिष्यमाणत्वेन प्रथम-
तेऽप्युच्चैर्निगदेनेत्यस्यो यानुयजुषेति वाक्यसङ्कोचकल्पनायाभावात्

द्भेदानुमापकत्वानुपपत्तेः, स्वरूपविचोच्चैस्त्वादे ऋगादिधर्मत्वे परप्रत्यायन रूपकार्यानुरोधेनोपांशुत्वानुपपत्तेः उपांशुयजुषेत्यस्य निगदाविषयत्वानुपपत्तेः सत्यपि निगदानां यजुष्ट्वे उच्चैर्निगदेनेत्यस्य निगदेषु पक्षप्राप्तमन्द्रादिव्यावर्तन फलकोच्चैस्त्वनियामकत्वोपपत्ते र्भेदानुमापकत्वायोगाच्च । नच लैङ्गिक परप्रत्यायनार्थत्वस्य ब्राह्मणवाक्यगतेन वाक्यप्रमाणकेनापि बाधशक्य, लैङ्गिकस्यापि प्रधानभूतस्य परप्रत्यायनस्याङ्गभूतनोपांशुत्वेनबाधायोगात् । उक्तं ह्यतत्प्रमाणबलाबलापेक्षया प्रमेयबलाबलं ज्याय इति । अतश्च लिङ्गेनैवोपांशु यजुषेत्यस्य संकोचितत्वान्नोच्चैर्निगदेनेत्यस्य संकोचकता । किंच नावश्यं लिङ्गस्यैव विधिसंकोचे व्यापार अपितु विधिवाक्यस्यापि स्वनिष्ठगौरवपरिहारार्थं स । तथाहि-उपांशुयजुषेत्यस्य निगदेष्वप्यन्तप्राप्तोपांशुता विधायित्वेना पूर्वविधित्वापत्ते स्तस्य च्चा द्दष्टाद्देश्यकत्वेन गौरवापत्ति । पुनश्च निगदभिन्नमन्त्रान्तरे पक्षप्राप्तोपांशुतानियामकत्वेन नियमविधित्वाद्वैरूप्यम् । अतो निगदातिरिक्तेष्वेव दृष्टपदार्थोद्देश्यकतालाघवार्थं स्वरविशेषनियामकत्वाङ्गीकरणात्स्वयमपि विधिस्स्वसंकोचेऽध्यवस्यति । अतश्चोपांशुत्वाविषयीभूतेषु निगदे षूच्चैर्निगदेनेत्यनेन स्वरनियमेनानुपपन्न ।

यत्तु -मृके उच्चैर्निगदेनेत्यस्य परप्रत्यायनरूपकार्यबलप्राप्तोच्चैस्त्वानुवादकत्व मुपांशुत्वविधिप्रशंसाफलकमङ्गीकृतम् , तदतिशयार्थं, मन्द्रादिस्वरान्तराणामपि पक्षे प्राप्तत्वेन नित्यवदनुवादायोगात् । परप्रत्यायनरूपकार्यरहितानामपि निगदानां सत्वेन तेषूपांशुत्वस्यापि पक्षप्राप्त्या सुतरां तदयोगाच्च । नचैव मुपांशुयजुषेत्यत्र वस्तुतो वेदोपक्रमाधिकरणन्यायेन वेदलक्षणावन्निगदपदेऽपि यजुर्वेदलक्षणापत्ते र्यजुर्वेदविहितकर्माङ्गभूतमन्त्रेषू च्चैस्त्वोपांशुत्वविकल्पापत्तिः, वेदोपक्रमस्यैकत्रैव लक्षणातात्पर्य ग्राहकत्वेनोपपत्ता वुभयत्र तदङ्गीकारे प्रमाणाभावात् । नच नियामकाभावः, 'यायो यजुर्वेद" इति यजुःपदसमभिव्याहृत वेदपदोपक्रमस्य यजुःपदलक्षणायामेव तात्पर्यग्राहकत्वेन तदासिद्धेः ।

यावति पदसमूहे लोके वाक्यत्वप्रसिद्धिः तावत्येव यजुष्ट्वं न तु वाक्यसमूहे, तस्यैकार्थं प्रतिपादकत्वाभावेन विनियोगानर्हत्वात् । लोके च यत्रैकार्थत्वे विभज्यमाने साकांक्षत्वं च तावत्येव वाक्यत्व प्रसिद्धेः तावत्येव यजुष्ट्वमित्यवगम्यते ।

ननु किमिदमर्थैकत्वम्? न तावत्पदार्थैकत्वं, तेषां गामानयेत्यादि वाक्ये नैकत्वात् । नापि वाक्यार्थैकत्वं ? तस्यापि संसर्गरूपत्वेन प्रतिपदार्थं भेदात् । नापि प्रयोजनैकत्वं, तथात्वेऽपि रूपप्रयोजनैकत्वं विवक्षितं तत्रस्सौर्यं चरुमित्यादौ द्रव्यदेवते प्रतियाग. यागश्च प्रतिफलमित्यनेकार्थत्वात् दर्शैकत्वानापत्तिः, " सर्वेभ्यो दर्शपूर्णमासा" वित्यादौ च । अथ मुख्य विशेष्यप्रयोजनैकत्वं? तदा "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत " इत्यादावाग्नेयादिभावनानां मुख्यविशेष्याणां भिन्नत्वात् तदेकत्वानापत्तिः । अथ मुख्यविशेष्यप्रतिपादकशब्दैकत्वं, ततो व्रीहियव वाक्ययो भंगोवा विभजत्वित्यादौ च तत्प्रतिपादकशब्दभेदे नार्थैकत्वानापत्तेः. विभज्यमानसाकांक्षत्वरूपविशेषणोपादान वैयर्थ्यमिति चेन्न,-भिन्नप्रतीतिविषयानेकमुख्यविशेष्यराहित्यमर्थैकत्वं. अस्ति च गामानयेत्यादौ तत्, आनयनभावनाया मुख्यविशेष्यभूताया एकत्वात् । अस्ति चेदं दर्शपूर्णमासवाक्येऽपि, अनेकासामाग्नेयादिभावनानामेकेन प्रत्ययेनोपादानात् भिन्नप्रतीति विषयत्वासिद्धेः. व्रीहियवादिवाक्ययोः भंगोवा विभजत्वित्यादौ च सत्यपि भिन्नप्रतीतिविषयत्वे मुख्यविशेष्यस्य यागविभाग भावनादेरेकत्वात् दर्शैकत्वोपपत्तिः । न चात्र ' आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां" मित्यत्र क्लृप्तिभेदे ' क्लृप्तीर्वाचयती "ति बहुवचनं द्विभागभेदे प्रमाणमस्ति, यतोऽर्थभेदः शंक्येत । अतस्सत्यपि व्रीहियववाक्ययोः " भगो वा विभजतु अर्यमावा विभजतु पूषा वा विभजत्वि " त्यादौ चोक्तविधार्थैकत्वे विभज्यमानसाकांक्षत्वाभावात् वाक्यभेदसिद्धिः । विभज्यमानसाकांक्षत्वं चान्वीयमानयोः पदार्थयोरनन्वये अनिवृत्ताकांक्षत्वं । यथा गामानयेत्यत्र गोशब्दस्य । न च भगोवाऽमित्यत्रार्यमावामित्यस्यानन्वये साकां

स्त्वमस्ति, स्ववाक्योपात्त विभज्यमानत्वेनैव निराकांक्षत्वात् । अतोऽस्येवाविभज्यमानसाकांक्षत्व विशेषणसार्थक्यम् । अर्थैकत्वविशेषणस्य प्रयोजनं तु 'स्योनं ते सदनं करोमि' इत्यस्यापि तस्मिन् सीदेत्यनेनानन्वये तच्छब्दस्य साकांक्षत्वेन विभज्यमानसाकांक्षत्वा देकवाक्यत्वापत्ते र्द्रष्टव्यम्, तत्र विभज्यमानसाकांक्षत्वे ऽप्यर्थैकत्वाभावात् । नहि सदनकरणं प्रतिष्ठापन भावनयो रेकपदोपादानमस्ति, येनैकप्रतीतिविषयत्व माशङ्क्येत । सदनकरणभावनायाः प्रतिष्ठापनभावनायां प्रकारत्वाङ्गीकारेण मुख्यविशेष्य भेदराहित्य शङ्का तु आख्याता तस्यापि मुख्यविशेष्यता प्रतीतेः तच्छब्दस्य च वाक्यान्तरोपात्त सदनकरणप्रकाशकत्वेनाप्युपपत्ते र्वाक्येनलिङ्गबाधायोगादयुक्ता । अतोऽर्थैकत्वाभावादेव तत्रैकवाक्यत्वाभावः । देवस्य त्वेत्यादिवाक्यं तु भयं सत्वा युक्त निर्वपामीत्यन्तस्यैकवाक्यत्वम् । अतश्च तावत्यव यजुष्ट्वमपि, तावत एवार्थप्रकाशकत्वेन यागसाधनत्वात् । न च यागसाधनत्वमात्रेण यजुष्ट्वम्, ऋच्यपि तदापत्तेः, जपादिसाधनेषु तदनापत्तेश्च, किंतु मन्त्रत्वावान्तर धर्मरूप मखण्ड तदित्यङ्गीकर्तव्य, तस्य च वेदत्ववत् सर्वमन्त्रेषु व्यासक्ति कल्पनेऽपि यजुरवयवस्यैव विनियोगेन प्रकाशकत्वापत्ते र्नयजुष्ट्वस्य पर्याप्तिकल्पने प्रमाण मस्तीतिवाच्यम् ;- "मन्त्रएव स्तत्वय निगदभूतो भवति तस्माद्यजु" रित्यादौ वाक्येऽपि यजुःशब्दप्रयोगा त्पर्याप्ति वृत्तितोपपत्ते । अन्यथाऽपि सर्वेषु मन्त्रवाक्येषु व्यासक्ते यजुष्ट्वे एकस्मिन्निगदे यजुरवयवायां यजुःशब्दप्रयोगोपपत्ति । अतो वाक्य पर्याप्त यजुष्ट्वम् । एव मन्त्रत्वमपि वाक्ये मन्त्रशब्दप्रयोगात्पर्याप्तमेव । वेदत्वन्तु एकस्मिन्वाक्ये अधीते वेदोऽधीत इति व्यवहाराभावा द्व्यासज्यवृत्त्येवेति वक्ष्यते । नचैव मन्त्रत्व यजुष्ट्वयो र्वाक्यमात्रवृत्तित्वे किंचिदूनेऽपि तस्मिन्मन्त्रत्वाद्यनापत्तिः, गां टुनिजातेविषाणेवा भग्नेगोत्वमत्यभिज्ञानबलेन गोत्वस्य ऽद्यापि तदाकारे बाधकाभावात् । अतएव पद नमात्वभिन्ना, यथा सोमायेत्वाक्यमात्र ट्रिम्भास

रेषु, तत्र नैव मन्त्रत्व मित्युक्तं प्राक् । तस्मा सिद्धं वाक्यमात्रवृत्ति यजुष्ट्वमिति ।

सूत्रन्तु यद्विभज्यमान साकांक्षं पदजातं तदर्थैकत्वे स त्येकं वाक्यमित्येव लोकेप्रसिद्धं, अतस्तादृशवाक्यवृत्त्येव यजुष्ट्वमि त्येवमध्याहारेण व्याख्येयं । ननु यथा श्रुतमेव वाक्यलक्षणपरं मेक वाक्यत्वलक्षणपरंवा, पूर्वोक्तमन्त्रप्रस्तावेनासंगतत्वापत्तेः । अतोमन्त्राणां तद्विभागेपूर्वं निरूपिते अधुना तदवान्तरभेदस्य यजुषःपरिमाण निरूप्य वदति द्रष्टव्य । अतएव ऋक्सामरूपयो स्तदवान्तरभेदयो रप्ये प्रसिद्धपरिमाणत्वा सदनिरूपणेपि नक्षतिः ।

इति यजुःपरिमाणाधिकरणम् ॥ १४ ॥

अथ वाक्यभेदाधिकरणम् ।

॥१॥ सू — समेषुवाक्यभेदःस्यात् ॥ २ - १ - ४०॥

सेदेवं विभज्यमानसाकांक्षत्वविशिष्टार्थैकत्वकृतवाक्यैकत्वेन यजुः परिमाणे चिंतिते, अधुना विभज्यमानसाकांक्षत्वादिकमेव कियत्सु पदेषु व्यासक्तमिति विचार्यते । दर्शपूर्णमासयोः "इषेत्वोर्जे त्वावायवस्थे" त्यादि समाम्नायते । तत्रवायवस्थेत्यादेस्तावद्वत्सापाकरणे विनियुक्तस्य स्थेति क्रियापदसत्त्वा द्वायुवच्छीघ्रगामिनो भवतमातृसमीपंपुनरागामिनो भवते त्युक्तेचार्थादपाकरणप्रतीतेर्द्वैवस्पष्टैवेति मंत्रभेदव शुज्ञान परिमाण, 'इषत्वे' त्यादे स्त्वेकवचनांतस्य शाखाच्छेदनादौ विनियुक्तस्य वायवस्थेत्यनेनैक वाक्यत्वासंभवात्ततोभिन्नत्वेनावगतस्यापि स्ववाक्ये आख्यातपदाश्रवणा द्यजुर्ज्ञान परिमाणमिति चिन्त्यते किंपदैकं यजुरिति । तथा वाजपेये पतिनं

“आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां अपानो यज्ञेन कल्पता” मित्यादि ।
तत्रापि कियदेकं यजुरिति चिन्त्यते । तदर्थं चार्थैकत्व विभज्यमानसा
कांक्षत्वे कियत्सु पर्याप्ते इत्यपि चिन्तनीयं ।

तत्रेषेत्वेत्यादावाख्यातपदा श्रवणेपि साकांक्षत्वा त्तत्तावदवश्यं
कल्पनीयं । नच साकांक्षार्थज्ञानस्यापि मन्त्रजन्यस्यादृष्टार्थत्वेन जपादिव
दुपपत्ते नाध्याहारावश्यकत्वमिति वाच्यं, “इषेत्वेति शाखांछिनत्ति ऊर्जे
त्वेत्युन्मार्ष्टी”तीतिकरणेन च्छेदनाद्यङ्गत्वेन मन्त्रविनियोगा न्मन्त्र इतिकर
णावगतकरणत्वस्य चाभिधानं विनानुपपत्ते. छेदनादिप्रकाशकत्वावगमेन
छिनद्मीत्यादि पदाध्याहारावश्यकत्वप्रतीतेः । अतश्चाश्रूयमाणस्यैकस्यैवा
ख्यातस्य कल्पनोपपत्तौ अनेककल्पने प्रमाणाभावा दिषेत्वोर्जेत्वेति पदचतु
ष्टयांते एकमेव तदध्याह्रियते । यद्यपि च विनियोगभेदात्पूर्वपक्षेपि छिनद्मि
उन्मार्ज्मीत्याद्याख्यातद्वयकल्पनमावश्यकं, तथापीषेत्वेत्यस्य सामर्थ्यात्प्रा
करणिकसर्वयोग्यक्रियार्थत्वस्यावगतस्या न्यक्रियाविषये बाधे ऽप्युन्मार्जन
विषयेपि बाधे प्रमाणाभावेन समस्तस्यैवैकत्रविनियोगावगते रेकवाक्य
त्वोपपत्तिः । नचोर्जेत्वेत्युन्मार्ष्टीत्यस्यैवपदद्वयमन्त्र विनियोजकस्य ब्राह्म
णवाक्यस्य सामर्थ्यप्राप्तेषेत्वेतिपदद्वयबाधकत्वं, तस्य प्रतीकग्रहणेनापि
समस्तविनियोजकत्वोपपत्तौ सामर्थ्यबाधे प्रमाणाभावात् । नचैषेत्वेति
शाखां छिनत्तीत्यस्यादिप्रतीकेन समस्तविनियोजकत्वोपपत्ता वप्यूर्जेत्वे
त्यस्य कथम्मध्यप्रतीकेन समस्तविनियोजकत्वमिति वाच्यम्, “आनः प्राण
एतु परावत आंतरिक्षाद्दिवस्परि : आयुः पृथिव्या अध्यमृतमसि प्राणाय त्वे”
ति मन्त्रस्य “प्राणाय त्वेति हिरण्यमभिव्यनीति” इत्यनेनांतिमप्रतीकेनापि
विनियोगस्य संकर्षे दृष्टप्रमाणत्वात्, तन्न्यायेनात्र मध्यमप्रतीकेनापि
समस्तविनियोगोपपत्ते. । अतश्च समस्तस्यैकाख्यातकल्पकत्वेनैकार्थ
त्वा त्तस्मिंश्च सर्वेषामन्वये अनिवृत्ताकांक्षत्वेन विभज्यमानसाकांक्षत्वा
दयवावयताख्याभेन यजुष्ट्वोपपत्तिः । बल्हृपादिमन्त्रेषु यद्यपिकल्पत

मित्याम्प्यातमुक्तम् , तथापि विभागवक्लृप्तिभेदे प्रमाणाभावेनैकार्थत्वोपपत्तेः । न चापूर्वादिकारकभेदादेव क्लृप्तिभेदः, भगादिपदेष्व स्वतोऽसमवेतत्वेन स्तुतिमात्रोपयोगितया एकस्यामपि क्रियाया निर्देशसंभवेन भेदकत्वात् । न च क्लृप्तीर्वाचयतीति सकृदपाक्लृप्तिभेदः, वाचयतेरुच्चारणानुकूलप्रयोजकव्यापारवाचित्वेन तदन्तर्गतवचनकर्मतया अर्थरूपायाः क्लृप्तेरन्वयायोगेन क्लृप्तिपदस्य कल्पतामितिपदरूप कार्यावगते स्संख्यायास्तन्निष्ठत्वेन क्लृप्तिरूपार्थनिष्ठत्वाभावात्तद्भेदकत्वानुपपत्तेः । न चैवमेकार्थत्वोपपत्तावपि विभागवदेव विभज्यमान साकांक्षत्वाभावा न्नैकवाक्यत्वोपपत्तिः, एतेषामोत्साहनार्थत्वेन दृष्टार्थानामपि क्लृप्तीर्वाचयतीत्यनेन समुच्चयावगमा देकस्मि न्नोत्साहनार्थं क्लृप्तिप्रकाशनरूपेकार्थे अनेकेषामपि कल्पतामितिपदानां परस्परसाहित्यावगमेन विभागेऽपि नियताकांक्षत्वोपपत्तेः । विभाज्यमन्त्रेषु मंत्राणा दृष्टार्थत्वेन विकल्पा त्साहित्यानवगते विभागेऽपि परस्परानाकांक्षत्वान्नैकवाक्यत्वोपपत्तिः । अतश्च क्लृप्तिमन्त्रेष्वप्येकत्वविशिष्टविभज्यमानसाकांक्षत्वघटितवाक्यैकत्वलक्षणा एकं यजुष्ट्वमिति ।

केचित्तु क्लृप्तिमन्त्रे वास्तवमेकवाक्यत्व मुपपादयितु मसमर्थाः-उदाहरणद्वयेऽपि मन्त्राणामदृष्टार्थत्वमंगीकृत्य अदृष्टस्यैकस्यैव कल्पनयोपपत्तेः, अनेककल्पनायोगा दादृष्टरूपैकार्थत्व परिकल्प्य तस्मिन् विभज्यमानसाकांक्षत्वादेकवाक्यत्व कथयन्तः "यद्यपि च पूर्वसूत्रेऽशास्त्रव मन्त्रो जनेकत्वेनैकार्थत्व विवक्षितम्, किंतु मुख्यविशेष्यभूतशास्त्रमन्त्रो जनेकत्वेनैवव्रत , तथाप्यस्माताभिप्रायस्यैवाय पूर्वपक्ष" इत्याहुः तदास्मदैकवाक्यत्वस्यापि क्लृप्तिमन्त्रे उपपादितत्वात् , अदृष्टार्थत्वांगीकारेच प्रमाणाभावात् , तदैक्यस्यच विनियोगभेदेन शास्त्रोच्चारणकमित्वेनच कल्पनानुपपत्तेः, कल्पितेऽपि तस्मिन्मिलितपदार्थानामन्वयानुपपत्तेः, अन्सवान्वयांगीकारेऽपि च साकांक्षत्वाभावादेकवाक्यत्वकल्पनानुपपत्तेः, ईदृशैकवाक्यत्वस्य पूर्वसूत्रे अनभिप्रेतत्वाच्चोपेक्षितम् ।

तस्मात्पूर्वोक्तविधयैवैकवाक्यत्वम् । इतिप्राप्तेभिधीयते-नात्रैकवाक्यत्वं। तथाहि-आद्योदाहरणे तावद्विनियोगभेदेनैवार्थभेदान्नार्थैकत्वम् । नच मध्यांत प्रतीकेन समस्तस्यैवोभयत्र विनियोगात्प्रत्येकमर्थभेद ? तत्रह्यादिमध्यान्त प्रतीकेनविनियोगः, यत्रमंत्रस्वरूपाम्नानवेळायामेव 'पदानां परस्पराकांक्ष त्वम् , यथास्मदुदाहृतेमंत्रे । तत्रहि "प्राणायत्वेतिहिरण्यमभिव्यनिमि" त्युक्ते कथं हिरण्याभिव्यननस्य प्राणप्राप्त्यर्थत्वपेक्षिते परावतोदूरदेशा दन्तरिक्षाद्दिवश्च परिसर्पतः प्राणः नः अस्मानागच्छतु यश्चपृथिव्याअधि उपरि आयुः तदप्यागच्छतु यतस्त्वामृतत्वेन प्राणदानसामर्थ्यादित्यन्योन्या कांक्षत्वं मंत्रस्वरूपाम्नानवेळायामेवप्रतीयते । अतस्तत्रयुक्तोमध्यां त्यप्रतीकेनापिविनियोगः । प्रकृतेतु मंत्रस्वरूपालोचनवेळायां मिषे त्वेत्यस्योर्जेत्वेत्यनेन निराकांक्षत्वप्रतीतेः पश्चादवगम्यमानोविनियोग एकोपि नप्रतीकग्रहणायालं, पूर्वावगतनैरपेक्ष्यभंगापत्ते । किमुतयदा यथापेक्षितोविनियोगभेद एवस्पष्टतरोवधार्यते तदाकः प्रसंगोम ध्यान्त्यप्रतीकेन समस्तविनियोगस्य । किंचालिंगातकल्पकतावच्छेदकं वचगुरुभूतम् । पुनश्चकार्यकारणभावद्वयेपि कारणतावच्छेदकैक्या दव्यभिचारप्रसंगः ।

यत्तु-सामर्थ्यबलेन इषेत्वेत्यस्योन्मार्जनांगत्वावगमात्तद्बाधार्थं समस्तविनियोग इत्युक्तं । तत्सामर्थ्यकल्प्य श्रुतेः पूर्वमेव प्राप्तश्रुत्या छेदनांगत्वेन विनियोगेवगते सामर्थ्यस्य श्रुत्यकल्पकत्वात् दुन्मार्जनांग त्वबोधकप्रमाणाभावे नोपेक्षणीयम् ।

तस्मादर्थैकत्वविशिष्टविभज्यमान साकांक्षत्वाभावात् भिन्नवा क्यत्वप्रतीते. र्युक्तो यजुर्भेदः ।

द्वितीयोदाहरणेतु सत्यप्यर्थैकत्वे विभज्यमानसाकांक्षत्वाभावान्न विभागमन्त्रवदेकवाक्यत्वं । नच वल्मीं वांचयतीत्यनेन सर्वेषां कल्पता मितिपदानां समुच्चयविधानादेकस्मिन् यत्नप्रकाशने तादि

ऽर्थावगते विभज्यमानसाकांक्षत्वोपपत्तिः, सकृदुच्चरितस्यैव पदस्य क्लृप्तिबोधजनकत्वेन क्लृप्तिबोधेनैकपदसाहित्यस्य बाधितत्वात् । क्लृप्तीर्वाचयतीत्यत्र च न क्लृप्तिपदं कल्पतामिति पदपरं, तद्घटितमन्त्रपरं वा, लक्षणाप्रसंगात् । अपितु क्लृप्तरूपार्थपरमेव । नच क्लृप्तिरूपार्थपरत्वे तस्योच्चारणानुकूलव्यापारवाचि वाचयत्यन्तर्गत वाचिकर्मत्वानुपपत्तिः, वचपरिभाषणइत्यनुशासनबलेन वचेरभिधानार्थत्वे तथाच प्रत्ययार्थस्य कर्मत्वोपपत्तेः । अतएव क्वाचित्को वचेरुच्चारणे प्रयोगो लाक्षणिकइत्यनुसन्धेयं । एवंच क्लृप्तिपदस्यार्थपरत्वावसायात्तस्याश्च बहुत्वसंख्यया भेदावगते स्वर्थभेदोऽप्यत्रसुलभएव । युक्तश्चोत्तराधिकरणन्यायेन यावत्प्रथमान्तं क्लृप्तिभेदइति न कपिञ्जलाधिकरणन्यायेन त्रित्वमात्रपर्यवसानाशंका । विभागमन्त्रेतु बहुवचनाभावात्कारकभेदस्यच स्वरूपेणासमर्पितत्वात् एकस्यामपि क्रियायां स्तुतिमात्रार्थत्वेनोपपत्तेर्न भेदकतेति विशेषः ।

अतश्च क्लृप्तीर्वाचयतीत्यस्य क्लृप्तिभेदकतयाप्युपपत्तेस्ततःमंत्रसमुच्चयस्य च मंत्राणां भिन्नार्थत्वादेवासिद्धे स्वर्थभेदावगमाद्विभज्यमानसाकांक्षत्वस्य च दूरापास्तत्वाद्वाक्यभेदावगमेन यजुर्भेदोपपत्तिः । प्रयोजनं प्रथमोदाहरणेस्पष्टमेव । द्वितीयेतु प्रत्येकंमंत्र क्रमेणानुसन्धानमेकमंत्रपक्षेपि तत्तन्मन्त्रोच्चारणंसिद्धान्ते । पूर्वपक्षेतु सकृदेवतदनुसन्धानं समस्तोच्चारणंचेतिद्रष्टव्यम् ।

सूत्रंतु–समेष्वन्योन्य निराकांक्षेषु वाक्यभेदस्स्यादितिस्पष्टम् ।

इति वाक्यभेदाधिकरणम् ॥१५॥

अथ अनुषंगाधिकरणम् ॥

॥१॥ सू - अनुषङ्गोवाक्यसमाप्ति स्सर्वेषु तुल्ययोगित्वात ॥२-१-४१॥

ज्योतिष्टोमे तिसृणामुपसदां द्वितीयतृतीयचतुर्थेष्वहस्सु पूर्वाह्णा पराह्णभेदेन द्विरावृत्त्यानुष्ठीयमानानां क्रमसंहितायां मंत्रत्रयमुपसदङ्ग भूतोपहोमांगत्वेनसमाम्नातम् । तत्राद्य, - "अग्नेयाशयातनूर्वर्षिष्ठा ग्रवचो अपावधींत्वेषवचो अपावधींस्वाहा" इति । द्वितीयतृतीयौतु "यातेअग्नेरजाशया यातेअग्नेहराशया" इति । एतेषांच मन्त्राणां क्रमेणैकैकस्यतस्तदहःक्रियमाणोपसदंगभूतहोमांगत्वेप्यविवादः । तत्रो त्तरयोर्मन्त्रयो र्यच्छब्दस्त्रीलिङ्गनिर्देशा स्त्रीवाचकपदसाकांक्षत्वावगते रवश्यं कश्चित्तत्परिपूरणसमर्थो वाक्यैकदेशः कल्पनीयः । नचा ध्ययनविधिना ध्ययनोपायनियमा त्कथमनधीतस्य तदेकवाक्य त्वोपपत्ति रितिवाच्यम्, अत्यन्तपठिते वेदेतन्नियमेपि अनधीते यथा दिपदवद्वेदैकदेशत्वोपपत्तेः । ततश्चावश्यकल्पनीये वाक्यैकदेशे किंलौकिकोध्याहर्तव्यः उतवैदिकएवतनू रित्यादि राद्यमन्त्रैकदेशो नुषंजनीय इतिसन्देहः ।

अत्रानुषंगपक्षे आम्नानस्य सर्वार्थत्वेनैव साधयिष्यमाणत्वेनानुष क्तस्याम्नातत्वेन मन्त्रत्ववद्यजुष्ट्वस्याप्युपपत्तेः पूर्वत्र यजुःपरिमाण चिन्तात्मकत्वेन संगत्युपपत्तिः ।

तत्रवैदिकश्शेष आद्यानन्तरपठितत्वा दपेक्षितदेशपाठाच्चाद्यस्यैव स्वारस्येन सम्बध्यते नानन्तरयो रिति तावदविवादम् । अतश्च गृह्यमाणविशेषत्वा त्प्रयाजादिवत्सर्वार्थं एवायमाम्नात इति नैवाशङ्कि तुंशक्यम् । नचविशेषस्याद्यसंबंधेन निराकांक्षत्या प्युत्तरयोस्सा कांक्षत्वात्तदन्वयोपपत्तिः, तयोरप्यनिबद्धलौकिकशेषग्रहणेन निरा कांक्षयो राद्यमन्त्रमात्रनिबद्धवैदिकशेषग्रहणानुपपत्तेः । अतएव अस्मि

यथापस्तुवत" इत्यस्यलौकिकाग्निग्रहणेनापि निराकांक्षत्वात्कार्यवि शेषपुरस्कारेण निषद्धानां वचनव्यतिरेकेणा पतनाद्बर्हिर्लुमशक्यानां माहवनीयादीनां माग्निपदेनाग्रहणमिति स्पष्टमेवक्ष्यते । एवंच सत्यपि यदि लौकिकस्या प्रकृतत्वादाग्नेर्यामंत्रन्यायेनापि प्रकृतस्यैव वैदिकस्यत नूरित्यादि ग्रहणमित्याशक्येत ? तत्र आग्नेर्यामन्त्रस्यान्यत्रविनियुक्तस्यापि कुशादर्यादय इतिवत्समस्तस्यान्यत्रविनियोगे मन्त्रत्वानपाये मन्त्रैक देशस्य तनूरित्यादे रन्यत्रनयने मन्त्रत्वानापत्तिः । अतश्चोपग्धित त्वन्मयापि स एवगृह्यते । नत्वेतावतातस्यमन्त्रत्वं यजुष्ट्वं वाक्यत्व मापादयितुमितिनतद्भ्रेषेयजुर्भेषनिमित्त प्रायश्चित्ताद्यापत्तिरिति माप्ते –

अभिधीयते । वैदिकस्यैव सर्वत्रानुषंगः,तस्य स्वार्थमाम्नातत्वात् । यथैवहि तनूरित्यादे राद्यमंत्रसबंधे आकांक्षासन्निधियोग्यता.कारणं तथैवोत्तरमंत्रद्वयसंम्बंधेपि । तथाहि । आकांक्षाताव द्विशेष्यविष यिण्याद्यस्येवोत्तरयो रप्यविशिष्टा । योग्यताच निराकांक्षीकरणसाम र्थ्यरूपा पूर्वस्मिन्निवोत्तरयो रप्यविशिष्टैव । सन्निधिस्तु यद्यप्यानंतर्यरूपो नाविशिष्टः,तथाप्यसम्बंधिपदाव्यवधानरूपोऽविशिष्टएव ।नह्यानंतर्यमेव स्सन्निधिश्शाब्दबोधकारण, तदभावेपि देवदत्तगामानयेत्यादौ देव दत्तादिपदानां मानयनान्वयदर्शनात् ; अपितवसम्बन्धिपदाव्यवधानमेव। गोशब्दस्यच सत्यपिव्यवधायकत्वे आनयनान्वयित्वेननासंम्बधित्वम् । अतश्च प्रकृतेप्याद्यस्येवद्वितीयेतृतीयेपि चोक्तरूपस्सन्निधिरवि शिष्टः । नच द्वितीयेसन्निध्युपपत्तावपि तृतीयेनैव व्यवहितत्वात्कथं सन्निधानोपपत्तिरितिवाच्यम् , द्वितीयस्यापि शेषान्वययोग्यत्वेन गोप दवदसम्बन्धित्वाभावात् । अतश्च सम्बन्धिपदाव्यवधानरूपस्य सन्नि धानस्य सर्वेष्वविशेषात्स्वार्थं माम्नानावगते स्सर्वसम्बन्धोपपत्तिः । अत ए वैकस्यैवाव्यवहितानन्तर्यं । यथापेक्षितश्च स्वपाठोत्तरकाले पाठोपर्यांक्तं

त्तिरकरः, सर्वमंत्राव्यवहितानंतर्यस्य सकृत्पाठे शक्यत्वेना वृत्तपाठस्य चाकांक्षादित्रयेणैव सर्वार्थत्वज्ञानोपपत्ते रनर्थकत्वेन सर्वान्तपाटनियमस्यचा पादयितुमशक्यत्वेन एकाव्यवधानस्या वर्जनीयत्वात् । उत्तरयोरपेक्षितदेशोच्चारणस्य लिंगेनैव ज्ञातुं शक्यत्वाच्च । ततश्च युक्त माकांक्षादित्रयसाधारण्या त्सर्वार्थत्वम् । नचैव मव्यवधानस्या न्वयाप्रयोजकत्वे समानपदप्रत्यासत्त्यायागस्यैवकरणत्वोक्ति र्विरुध्येतेति वाच्यम् , अव्यवहितानंतर्यस्यान्वयतात्पर्यग्राहकत्वाभावे प्यन्वयनियामकत्वोपपत्तेः । तत्रहि फलनिरूपकत्व किं यागस्योतसोमादेरित्यनियमे प्राप्ते नियामकमात्रं पदप्रत्यासत्तिः । प्रकृतेत्वाकांक्षादित्रयसाधारण्यात्सर्वत्रनियमेनैव सम्बन्धप्राप्तेर्नानंतर्यस्यनियामकत्वोपपत्तिः । नह्येकस्यनैराकांक्ष्येणेतरयोर्नैराकांक्ष्यं शक्यते वक्तुं । ततश्च यथैव प्रयाजादीनां सत्यप्याग्नेयाव्यवधाने अग्नीषोमीयादे रप्याकांक्षादित्रयसाधारण्यात्सर्वार्थत्व मेवमिहापिद्रष्टव्यम् । तस्मा द्वैदिकस्य सर्वसम्बन्धरूपानुषंगएवयुक्तः, नतुक्रमिकान्वयांगीकारेणैकसम्बंधएव वैदिकत्वम् इतरसम्बंन्धेत्वलौकिकत्वमिति । यत श्शेषान्वयं विनाआद्यस्येवोत्तरयोरपि न परिसमाप्ति रतस्सर्वेषु तुल्याम्नानादनुषंगइतिसूत्रार्थः । प्रयोजनंतु तद्रूपे यजुर्भेदप्राप्तिस्स्पष्टैव ।

एवं तावदनेकेषा मुत्थिताकांक्षाणां सन्निधावाम्नायमानश्शेषस्सर्वत्रानुषज्यतइत्युक्तम् । इदानीं तुल्याप्याकांक्षाणा मनेकेषां सन्निधावाम्नायमान श्शेषस्सर्वत्रानुषज्यते नवेति विषयव्याप्त्यर्थं तस्मिन्नेव सूत्रे विचार्यते । ज्योतिष्टोमे यजमानपावनार्थामन्त्राः- " चित्पतिस्त्वापुनातु वाक्पतिस्त्वा पुनातु देवस्त्वा सवितापुनात्वि " त्येवंविधाः क्रियापदान्तत्वेन स्वतोनिराकांक्षाः पठिताः । तेषामन्ते "अच्छिद्रेण पवित्रेण वसोस्सूर्यस्य रश्मिभि"रिति क्रियाकांक्ष श्शेषस्समाम्नातः । स किं मनन्तरेणैव मन्त्रेणसम्बध्यते उतसर्वैरपीति विचारः ।

तत्र तेषां स्वारस्वरूपेण निराकांक्षत्वा च्छेषाकांक्ष येषा कांक्षामुत्थाप्य सम्बन्धोवाच्यः । तत्रचैकपदसम्बन्धेनैव निरा

काङ्क्षस्य शेषस्य इतराकाङ्क्षा व्यापकत्वे प्रमाणाभावात् नियामकापे
क्षायां यागादाविव आनन्तर्यस्य नियामकत्वोपपत्तेर्न सर्वत्रानुषङ्गः ।
नचैवमपि यजमानं पावयतीति विधिनाविहितस्यैकस्यैव पावनस्य
त्रिभिरपि मन्त्रैः प्रकाशनाच्छिद्रादेश्च पूर्वसाधनीभूत प्रकाश्यमानपाव
नक्रियाकरण प्रकाशनार्थत्वात् पूर्वमन्त्रयोः स्यन्तिममन्त्रवत् प्रयोगोप
पत्तिरितिवाच्यं, पावनक्रियैक्येऽपि मन्त्रभेदेन तत्प्रकाशनानां भेदाद
न्तिमप्रकाशनविषयीभूत पावनक्रियाकरणप्रकाशनार्थस्यैवानन्तर्या
द्व्यवगतत्वेन चित्पत्याद्रि कर्तृव्यवस्थावदेव करणव्यवस्थाया अप्युपपत्तेः ।
नचात्रमन्त्राणां विकल्प येनैकस्मिन्नेव प्रकाशने त्रयाणां
व्रीहियवयोरिव धर्माणामव्यवस्थापत्तिः, सत्यपि दृष्टार्थत्वे त्रिभिर्यज
मानं पावयतीति वचनात् पार्थसारथि मिश्रधृत समुच्चयोपपत्तेः ।
अतश्च विकल्पोक्तिः याज्ञिकाचारविसंवादिनी वार्तिककारीयातिशया
र्थैव । अतश्च सत्यस्य च्छिद्रादेः स्वर्षाधावे प्रयाजादिव सकृत्प्रयुक्त
स्यैव सर्वोपकारकत्वोपपत्तेर्न प्रत्येक प्रयोगात्वानुषङ्गोपपत्तिः ।

वस्तुतस्तु बोधायनादिकल्पपर्यालोचनया पावनस्यापि मुखनाभि
गुल्फप्रदेशभेदेन त्रित्वात्ताभ्यां देकैक मन्त्रस्यैकैकाभ्यास करणत्वावग
मा दानन्तर्यविशेषणाच्छिद्रादे गुल्फप्रदेशसंस्कारार्थ पावनक्रियाभ्यास
प्रकाशकपदैकवाक्यतया विजातीया पूर्वसाधनीभूत पावनक्रियाभ्यासां
गत्वावगते 'पयसा मैत्रावरुण श्रीणाती' तिव दभ्यासान्तरे मानाभावा
द्व्यवस्थोपपत्तिः सुलभैव । अतो नेदृशस्थले अनुषङ्ग इति प्राप्तेभिधीयते –

आकाङ्क्षादित्रयसाधारण्यात् अत्रापि सर्वाम्नानावगमेनानुषङ्गेणैव
वाक्यपरिसमाप्तिः । तथाहि-सन्निधियोग्यत्वे तावत्पूर्ववदेवाविशिष्टे ।
आकाङ्क्षाचापि यथैवान्तिमस्यै तदाकाङ्क्षावशेन कल्प्या तथैव पूर्वयोरपि ।
नचात्रानन्तर्यस्य नियामकतासम्भवति । तत्रहि तन्नियामकं यत्र तत्प्रवृत्ते
पूर्वं विकल्पेनानेकेषु प्राप्तिः, यथा प्रतिपदाधिकरणसिद्धान्तरीत्या यागवा
क्यो । प्रकृतेतु त्रयाणामप्याकाङ्क्षाणामपि तेषां विनियमनाविरहेण प्रधानत्वा

त्यतिप्रधानावृत्तिन्यायेन च प्रत्येकं समुच्चयेनैव शेषग्राहित्वागते र्नियामकानाकांक्षत्वा न्नानन्तर्यस्य सन्नियामकत्वोपपत्तिः । अतश्च यदैवानेकहविष्कासु विकृतिषु श्रुतानामुपहोमानां विनिगमनाविरहेण प्रधानत्वेनच सर्वहविर्गतामेवाकांक्षां प्रकल्प्य समुच्चयेन सर्वार्थावगते र्नियामकाकांक्षाविरहेण नानन्तर्यस्य नियामकत्वं तथैव प्रकृतेपि पूर्ववदेव सर्वार्थ माम्नानावगते र्युक्तोनुषंगः ।

इत्यनुषंगाधिकरणम् ॥ १६ ॥

अथ व्यवेताननुषंगाधिकरणम् ।

॥ १ ॥ सू - व्यवायान्नानुषज्येत ॥ २-१-४९ ॥

असम्बन्धिपदाव्यवधाने सत्यनुषंगे साधिते यत्र सम्बन्धिपदव्यवधानं तत्रानुषंगो नास्तीति प्रत्युदाहरणार्थमिदं सूत्रं। यथा-"सन्तेवायु र्वातेन गच्छतां संयजत्रैरंगानि सयज्ञपतिराशिषे" इत्यत्र गच्छतामित्यस्यांगानीत्यनेन तावद्योग्यत्वेनासम्बन्धात् असम्बन्धिपदव्यवधानेन संयज्ञपतिराशिषेत्यनेन सत्यपि साकांक्षत्वे योग्यत्वेच सन्निधानाभावान्नानुषंगः । अतस्संयजत्रैरंगानीत्यत्र गच्छतामित्यस्यैव सयज्ञपतिराशिषेत्यत्रापि गच्छतामिति पदमध्याहर्तव्यम् ।

नचानयो स्साकांक्षत्वेपि गमनरूपस्यैवार्थस्य योग्यताबलेनान्यस्यान्वयोपपत्तेः किमर्थं पदाध्याहारेणेति वाच्यम्, तत्तत्पदार्थ शाब्दबोधत्वावच्छिन्नंप्रति वृत्तिमत्त्वसम्बन्धेन तत्पदज्ञानस्यैव कारणत्वात । अन्यथा देवदत्तः पचतीति केनचिदुक्ते प्रपत्रदृष्टेनैव चैत्रादिना धर्मांशानिवृत्तेः क्रियतामिति प्रश्नानापत्तिः । अस्मन्मतेतु